CC0. In Public Domain. Digitization by eGangotri

श्रीवैद्यनाथशिवप्रशस्तिः

श्रीविष्णुकान्तझाः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीः

श्रीवैद्यनाथशिवप्रशस्तिः

रचयिता
भारतप्रख्यातस्य ज्यौतिषाचार्य-ज्यौतिषरत्न-ज्यौतिषालङ्कारोपाधि-
विभूषितस्य महामानसस्य पण्डितप्रवरस्य
पूज्यतमस्य स्वर्गतस्य "उग्रनाथझा"-
शर्मण आत्मजन्मा—
श्रीविष्णुकान्तझाः

प्रकाशकः
पुरन्दरपुर, पाटलिपुत्रवास्तव्यस्य ज्यौतिषरत्न-ज्यौतिषाचार्य-
ज्यौतिषपञ्चानन-दैवज्ञशिरोमणि-साहित्यालङ्कारपदवीविभूषितस्य
श्रीवैद्यनाथशिवप्रशस्तिनिर्मातुः
श्रीविष्णुकान्तझाशर्मणः

आत्मजः
श्रीगणेशकान्तझाः

ग्रामो वैकुण्ठपुरम्, पत्रालयो वैकठपुर (खुशरूपुर), पटना-मण्डलम्
प्रथमसंस्करणम् १५००
२०२० विक्रमाब्दाः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[पुस्तकस्यास्य पुनर्मुद्रणप्रकाशनादिसर्वाधिकाराः ग्रन्थरचयित्रा तदात्मजेन प्रकाशकेन च स्वाधीनीकृताः]

पुस्तकप्राप्तिस्थानम्—

पण्डित श्रीविष्णुकान्त झा

चौहट्टा, बाँकीपुर

पटना–४

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Bihar Governor's Camp.

पटना

दिनांक १८/१/६४

"श्रीवैद्यनाथ-शिव-प्रशस्ति"-नामकस्य संस्कृतपद्यकाव्यस्य प्रणेत्रे, पद्मश्रीविभूषिताय, पण्डितश्रीविष्णुकान्तझामहोदयाय भूरिशः साधुवादाः क्रियन्ते ।

अस्मिन् काव्ये मन्दिरस्यादिकारणं, कथं च परमशिवस्य मूर्त्तिः या लङ्कायां स्थापयितुं रावणेन नीयमानासीत्, सत्या हृदि, हारीतकवने संस्थापितेत्यादिकस्य सुचित्रितं वर्णनं विहितमस्ति । स्थानस्य मन्दिरस्य च महत्त्वोत्पत्तिविषयिकी पौराणिकीपरम्परा समुपयुक्तपदैः प्रवहत्सुबोधभाषया च वर्णितास्ति ।

रावणस्यासाफल्यं ततः शिवलिङ्गापनयने तस्य सर्वशक्तेरसामर्थ्यं च साधु वर्णितमास्ते । श्रीपार्वती, अन्ये च देवाः शिवलिङ्गस्याराधनार्थं तत्रागताः शिवस्याज्ञया च ते सर्वे तत्रैव स्थायिरूपेण निवासं चक्रुः । वैद्यनाथधामस्थितं मन्दिरं च लब्धाकारैः देवायतनैर्निर्मितमस्ति । तत्रत्यदेवायतनानां मूर्त्तीनां च लेखनीचित्रमिव वर्णनं साधु समुपस्थापितम् ।

संस्कृतश्लोकानां पठनकाले एवमनुभूयते यत् पाठकाः वस्तुतः अधिमन्दिरं मूर्त्तिसमक्षं च स्वयं समुपस्थिताः सन्ति । अत्रत्या भाषा छन्दांसि च सम्यक् सुप्रयुक्तानि च चितानि सन्ति । वर्णनशैली सरला प्रवहन्ती चास्ति । न केवलं मन्दिरस्य, देवायतनानां, तत्रत्यप्रतिमानां नैव वर्णनं वर्त्तते अपितु पूजायाः, पद्धतेः, व्यवहारस्य च सविस्तरं वर्णनं कृतमस्ति । यद्यपीदं पुस्तकं स्वल्पकलेवरं तथापि तदुत्तरकाव्यैः सह सम्यक् साम्यमाधत्ते । ग्रन्थकर्त्ता संस्कृतभाषां सम्यगधिकरोति । अयमेको विशिष्टो विपश्चित् वास्तविको वैद्यनाथमहादेवोपासकश्चास्ति ।

अहं स्वयं श्रीविष्णुकान्तझामहोदयं वर्षद्वयमभिव्याप्य जानानो मुदमावहामि । प्रसीदाम्यहमेतत्कथने यदयं विशुद्धात्मा भक्तिभावापन्नः स्वीयपद्येषु भक्तिभावं भृशमुद्भावयति । शैली चास्येदृशी वर्त्तते यत् स्वल्पमपि संस्कृतं जानन् जनः सरलतया पुस्तकस्थं भावमवगन्तुं शक्नोति तदध्ययने चामन्दमानन्दमनुभवति ।

अहं विश्वसिमि यदयं ग्रन्थो लोकप्रियो भविष्यति प्रतिगेहं प्रतिपुस्तकागारं च स्थानं लप्स्यते । श्रीविष्णुकान्तझामहोदयेनास्माकं प्रथमराष्ट्रपतेः डाक्टरराजेन्द्रप्रसादस्य सम्मानार्थं काव्यान्तरमप्येकमलेखि यत् उपदेशप्रदं मनोहरं चाध्ययनमुपस्थापयति ।

अयमेकस्य सुकवेर्निखिलगुणैः, वैशिष्ट्यैः, योग्यताभिः, कलाभिश्च समन्वितो वर्त्तते । अहमस्य साकल्येन साफल्यं कामये ।

ह० मा० अनन्तशयनम् अय्यंगारः

18/1/64

(म० अनन्तशयनम् अय्यंगारः)

बिहार-राज्यपालः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

CHIEF JUSTICE
PATNA

HIGH COURT
PATNA

The Hon'ble Mr. V. Ramaswami, I. C. S.
BARRISTER-AT-LAW

प्रस्तावना

भारत-देशोऽयं पुण्यस्थानम् यस्य धूलिकणाः ऋषिमुनिभिः साधुमहात्मभिश्च पादपूताः। भारतमिदं तीर्थभूमिः पवित्रभूमिश्च पुरातनी। एवंभूतेषु तीर्थेषु पुण्यभूमिषु च गमनेन पापानि नश्यन्ति सुखप्रदपुण्यानि च प्राप्नोति मानवः। तथाहि भागवते :—

तत्रोपजग्मुर्भुवनं पुनाना
महानुभावा मुनयः सशिष्याः।
प्रायेण तीर्थाभिगमापदेशैः
स्वयं हि तीर्थानि पुनन्ति सन्तः॥

पुस्तकेऽस्मिन् श्रीविष्णुकान्तझा विदुषा सरल-सङ्गीतात्मके संस्कृते वैद्यनाथधाम्नः शिवस्य ज्योतिर्लिङ्गस्य महिमा वर्णितः यद्धाम हरीतकीवनम् केतकीवनम् हार्दपीठम् वापि नामभिः प्रसिद्धम्। कोटिरुद्रेष्वपि लिखितम् यत् ज्योतिर्लिङ्गदर्शनादेव सर्वाणि पापानि विनश्यन्ति अभ्युदयसौभाग्यानि प्राप्तानि भवन्ति च—

ज्योतिर्लिङ्गमिदं श्रेष्ठं दर्शनात् पूजनादपि।
सर्वपापहरं दिव्यं भुक्तिवर्धनमुत्तमम् ॥

श्रीविष्णुकान्तझा महोदयः प्रशंसनीयम् पुस्तकमिदं प्रस्तुत्य शिवभक्तानां संस्कृतसाहित्यस्य च कृते महत्सेवाकार्यमकरोत् यस्मिन् मन्दिरस्य सविस्तरं वर्णनं तदैतिहासिकपरम्पराः तत्पौराणिकसंसर्गाः लिखिताः सन्ति। ग्रन्थकर्त्तुः कृतिमिमामभिनन्दन् विरमति॥

ह० वी० रामस्वामी
प्रधान-न्यायाधीशः
उच्चन्यायालयस्य पाटलिपुत्रस्थितस्य

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

সভাপতি
বিধান পরিষদ্
পশ্চিম বঙ্গ
কলিকাতা।

CHAIRMAN
Legislative Council
WEST BENGAL
CALCUTTA

सभापति
विधान परिषद्
पश्चिमवंग
कलकत्ता ।

।। ॐ ।।श्रीः ।।

प्रारम्भिक-निवेदनम्

मैथिलस्य "झा" यद्वा अध्यापकाह्वस्य संस्कृतविद्यानिष्णातस्य ज्यौतिषशास्त्रैकपत्रिणः विद्वज्जनाग्रगण्यस्य श्रीमतो विष्णुकान्तस्य नवीनतमां कृतिं "श्रीवैद्यनाथशिवप्रशस्तिम्" आलोक्य नितरां सन्तुष्टोऽस्मि। पुस्तकमिदं सार्धत्रिशतश्लोकमयं प्राचीनस्थलपुराणानामनुकारि। महर्षिश्रीमद्-वेदव्यासानुप्राणितानां महापुराणोपपुराणग्रन्थानाम् अपि च नानातीर्थ-माहात्म्यप्रकाशकानां विविधस्थलपुराणानां या पुरातनी परम्परा संस्कृत-वाङ्मयम्, एतद्देशीयधर्मजीवनञ्च सदैव परिपोषयन्ती अधुनाऽपि क्षीणतया वर्तते, सा परम्परा पुस्तकेऽस्मिन सार्थकत्वेन दृश्यते। देवस्तोत्रं देवतासमक्ष-मात्मनिवेदनं विनयञ्चाधिकृत्य सुविस्तृतो यो रचनासम्भारश्चिरतरं गीर्वाण-गिरो गौरवरूपेण विद्यते, श्रीमतो विष्णुकान्तस्य सुभाविताः सुभाषिताश्च श्लोकास्तमेवानुसृत्य सर्वेषां हितसुखाय विराजन्ते। अधुनातनकाले भारते वर्षे संस्कृतभारत्या अर्चका ये सन्ति, तेषां मध्ये कवेरेतस्य ग्रन्थस्य आसनं प्रथम-सरण्यामेव, अत्र नास्ति संशयः। अस्य हृद्या मनोहारिणी रचनाशैली सर्वेषां सहृदयानां विपश्चितामानन्ददायिनी भविष्यति। ग्रन्थनिबद्धा श्लोक-मालेयं वर्णानां सौरभमयानां वाक्कुसुमानां महार्हा मालेव सरस्वतीपदे निवेदिता अस्माभिरपि सर्वैः सादरं शिरसि गृहीता विधृता च स्यात्—इति प्रार्थयामहे।

चाटुर्ज्याकुलजातस्य काश्यपस्य
'श्री' सुनीतिकुमारदेवशर्मणः ।

(शकाब्दाः १८८५ दीपावली तिथौ, ख्रिस्ताब्दाः १९६३ अक्तूबरमासस्य षोडशे दिवसे, गौड़वंगे कालीक्षेत्र-नगर्याम्)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

महामहोपाध्याय
श्रीउमेशमिश्र
एम० ए० डी० लिट्०
(उपकुलपति:)

अधिषद्-भवनम्
दरभङ्गा ...१६

मिथिला-मण्डल-वासिनः पाटलिपुत्रस्थस्य त्रिस्कन्धज्योतिःशास्त्र-निष्णातस्य विविधालौकिकशक्तिसम्पन्नस्य पद्मश्रीविभूषितस्य श्रीविष्णुकान्तझाशर्म्मणो नाम्ना को वाऽपरिचितो जनो विहार-राज्ये यस्य कृते तस्य विपश्चितः परिचयोऽपेक्षितो भवेत्? ज्योतिषशास्त्रं च तस्य कौलिकी सम्पत्तिः।

अनेन स्वविद्यावैभवेन देशाचारकुलाचाराद्याचारपरम्परोज्ज्वलीकृतेति साधारणी लौकिकी पद्धतिः। वस्तुतः सर्वस्या अस्या कल्याणपरम्परायाः सद्विचारमहत्त्वस्य मूलं वर्त्तते अस्य काचिद्दैवी शक्तिः यामन्तरा नेदृशी सर्वतो-मुखी गुणसम्पत्तिः कस्यापि भवितुमर्हति। अस्मिन् या मेधा दृश्यते यया चानायासेन शास्त्राणि कण्ठस्थानि सन्ति साऽन्यत्र सुदुर्लभा।

अस्य भारतीयसंस्कृतौ श्रद्धा, तदनुकूलाचरणे निष्ठा, ब्राह्मण्ये विश्वासः, महाविद्यासु भक्तिर्लौकिकव्यवहारे च नैपुण्यं, लोके सर्वत्र प्रतिष्ठा, रहस्यमयजीवनयापनमित्यादि सर्वं कस्या अपि अचिन्त्यशक्तेः फलमिति मे विश्वासः।

इदमेव हि कारणं येन न केवलं सरस्वती अस्य कण्ठस्था अपितु वाग्रूपेण लेखनीद्वारा समये समये छन्दोभिः बहिर्धाराप्रवाहेण निःसृत्याभिव्यक्ताऽपि भवति। अस्या एव शक्तेः प्रभावेणानेन सुखाङ्मयैस्तैर्वृत्तनिचयैः परात्परस्य त्रैलोक्याधिपतेः परमेश्वरस्य भगवतो वैद्यनाथस्य माहात्म्यं श्रीवैद्यनाथशिवप्रशस्तिरूपेण विलिख्य विदुषां पुरतः स्थापितम्।

ग्रन्थेऽस्मिन् श्रीवैद्यनाथशिवसम्बन्धे या याः कथाः पुराणादिषु श्रूयन्ते ताः सर्वाश्छन्दोमय्या सुन्दरसरलसंस्कृतभाषया सुनिबद्धाः सन्ति। ग्रन्थस्यैकस्यैवाध्ययनेन परमात्मनः शिवस्य श्रीवैद्यनाथमूर्त्तेः स्वरूपं ज्ञातुं शक्नुवन्ति भक्ताः। अनेन विदुषा बहवो ग्रन्थाः प्रशस्तयश्च विरचिताः किन्तु ताः सर्वाः लौकिकप्रतिष्ठार्थमेवासन्। अयं पुनः पारलौकिकप्रतिष्ठार्थमेव सम्पन्नः। स्वाभाविकमेवैतत् सर्वम्। मैथिला विद्वांसः 'ज्ञानमिच्छेन्महेश्वरात्' इत्यस्मिन् वाक्ये श्रद्धालवो भूत्वा जीवनस्य परार्धे शिवभक्ता एवाभूवन्निति श्रूयते। तदत्रापि चरितार्थतां लभते।

अस्तु ग्रन्थकर्त्तारो धन्यवादार्हाः। संस्कृतज्ञाः भक्ताः अपि संस्कृतभाषानिबद्धां श्रीश्रीवैद्यनाथशिवप्रशस्तिमुपलभ्य नितरां कृतार्थाः। शिवमिति।

संस्कृतविश्वविद्यालयः
दरभङ्गा (मिथिला)
३-१०-१९६३

विदुषामनुचरः
ह० श्रीउमेशमिश्रः
(श्रीउमेश मिश्रः)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वाराणसेय-संस्कृत-विश्वविद्यालयः
श्रुतं मे गोपाय

श्रीः

S. N. M. TRIPATHI
Vice-Chancellor

VARANASEYA SANSKRIT
VISHWAVIDYALAYA

पण्डितश्रीविष्णुकान्तझा-महोदयस्य "श्रीवैद्यनाथशिवप्रशस्ति"-नामकं पुस्तकं सम्यगध्यगमम्। श्रीवैद्यनाथः सुप्रसिद्धेषु द्वादशज्योतिर्लिङ्गेषु गण्यते, तन्माहात्म्यञ्च प्रायः पुराणेषु विस्तरेण समुपलभ्यते। प्रतिवर्षं सहस्रशो यात्रिणो दर्शनार्थं तत्र गच्छन्ति। एवंविधस्य दिव्यधाम्नो महिमा श्रीझा-महोदयेन सरल-सरस-प्राञ्जलभाषयोपनिबद्धः।

इदञ्च पुस्तकं श्रीवैद्यनाथधाम्नः पूर्णमेवावलोकनदृश्यं पुरत उपस्थापयति, तत्र जिगमिषूणां कृते च सम्यङ्निर्देशिकैव सामान्य-पाठकेभ्यश्च तत्रत्यं निखिलं परिचयं ददाति। श्रीवैद्यनाथस्य प्रादुर्भावमारभ्याद्य यावत् सर्वमेवेतिवृत्तं संक्षेपेणात्र समुपवर्णितम्। एवंविधाया रचनाया लेखको धन्यवादार्हः।

आशास्महे पाठका इदमधीत्य तद्दिव्यधाम्नः समग्रं परिचयं लप्स्यन्ते लेखकश्चाग्रेऽन्येषामपि तीर्थस्थलानां प्रशस्तिरचनाद्वारा संस्कृत-साहित्य-भाण्डागारं पूरयिष्यतीति।

सु० ना० म० त्रि०
(सुरतिनारायणमणित्रिपाठी)
(उपकुलपतिः)

५—११—६३

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ॐ

नमः शिवाय

रावणेश्वरबाबाश्रीवैद्यनाथाय शङ्कराय नमः।

श्रीवैद्यनाथ-शिव-प्रशस्ति-विषयानुक्रमणिका:

क्रमसंख्या	विषयाः	पत्राङ्काः
१	तपस्विरावणे शिवप्रसन्नता .. .	१
२	लङ्कागमनाय रावणस्य प्रार्थना	१
३	लङ्कागमनाय शिवप्रवृत्तिः पार्वत्याश्चिन्ता च	१
४	पार्वत्या रावणाय पेयजलदानम्	१
५	पार्वत्याश्चेष्टया शिवप्रतिज्ञा	२
६	शिवकृततत्स्वलिङ्गफलाभिधानम्	२
७	मध्ये शिवलिङ्गस्य नो स्थापनाय रावणस्य स्वीकृतिः ..	२
८	रावणद्वारा शिवलिङ्गोत्थापनम्	२
९	रावणस्य लङ्कागमनारम्भः	२
१०	देवनाश्चिन्ता	२
११	रावणस्य लघुशङ्कोद्वेगः	३
१२	लिङ्गमिदन्नो स्थाप्यन्तदर्थन्तस्य युक्तिनिरूपणम् ..	३
१३	विष्णुरूपिणो विप्रस्यागमनम्	३
१४	विप्रं प्रति शिवलिङ्गग्रहणाय रावणस्य विनयो .. .. विप्रेण शिवलिङ्गग्रहणञ्च	३
१५	रावणस्य मूत्रत्यागे विलम्बः, शीघ्रकरणाय विप्रोक्तिः ..	३
१६	विप्र-द्वारा हरीतक-वने सत्या हृदये तच्छिवलिङ्गस्य स्थापनम्	४
१७	श्रीवैद्यनाथनामकरणे हेतुः	४
१८	श्रीहार्दपीठविवरणम्	४
१९	शिवोपरि देवकृता पुष्पवृष्टिः	४
२०	शौचनिवृत्तरावणस्याग्रिमकृत्यचिन्तनम्	४

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्रमसंख्या	विपयाः	पत्राङ्काः
२१	रावणद्वारा स्नानाय पुष्करिणीनिर्माणम्	५
२२	लोके "शिवगङ्गा" इति नाम्ना तत्प्रसिद्धिः	५
२३	रावणद्वारा कूपनिर्माणम्	५
२४	"चन्द्रकूप"-नामकरणे कारणम्	५
२५	रावणद्वारा विधिवच्छिवार्चनं प्रार्थना च	५
२६	रावणे शिवप्रसन्नता, रावणनामोच्चारणानन्तरं .. .. मन्नाम ग्रहीष्यन्ति लोका इति शिवोक्तिः	६
२७	अस्य लिङ्गस्यार्चने रावणेश्वरपदस्य प्राथमिकता तत्फलञ्च ..	६
२८	पुनस्तच्छिवलिङ्गं लङ्कां गमयितुं रावणस्य प्रयत्नः; .. शिवस्य तदर्थमप्रवृत्तिः	६
२९	शिवलिङ्गमुत्थापयितुं रावणस्य बलप्रयोगस्तद्वैफल्यम् ..	६
३०	रावणाङ्गुष्ठेन तल्लिङ्गस्य भूमाववनामनम्, लज्जित- .. रावणस्य लङ्कापरावर्त्तनम्	७
३१	तच्छिवलिङ्गे रावणाङ्गुष्ठचिह्नमद्यपर्यन्तम्	७
३२	पार्वत्यास्तत्र समागमः	७
३३	भारतवर्षस्य पूर्वोत्तरभागे श्रीवैद्यनाथः शङ्करः	७
३४	ततोऽन्यदेवता निवासारम्भः	७
३५	देवमन्दिराणां निर्माणम् ..	७
३६	भगवतो वैद्यनाथस्य मन्दिरं विश्वकर्मणा निर्मितम् ..	८
३७	तीर्थमन्दिरयोर्विशिष्टता	८
३८	पार्वतीश-मन्दिर-ग्रन्थिबन्धवर्णनम्	८
३९	श्रीवैद्यनाथस्य पद्माकारमन्दिरसौन्दर्यवर्णनम् ..	८
४०	मन्दिरशिखरस्थसुवर्णकलश-त्रिशूलवर्णनम्	९
४१	श्रीशिवलिङ्गस्य सौन्दर्यादिवर्णनं कामदफलञ्च ..	९
४२	रजतवर्तुलाकारेण लिङ्गस्य सौन्दर्यं तत्स्पर्शे भय-निवृत्तिहर्षौ	१०
४३	शिवलिङ्गस्य कृष्णत्वे हेतुः	१०

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्रमसंख्या	विषयः	पत्राङ्काः
४४	देवेन्द्रवदस्य शिवस्य शोभा, पार्श्वस्थिता देवताश्च ..	११
४५	श्रीवैद्यनाथ-शिवसम्मुखस्थितदुर्गा	११
४६	तत्रैव त्रिपुरसुन्दरी पार्वती	११
४७	शिवसम्मुखमठे सैव गौरी दुर्गासहिता, तद्दक्षिणस्यां मन्दिरस्था नानादेवताः, जगज्जननी च	१२
४८	तत्पश्चिमे उत्तराभिमुखमन्दिरस्थो गणेशः	१२
४९	तत्पश्चिममन्दिरे ब्रह्मा	१२
५०	तस्मात् प्रतीच्यां मन्दिरस्था गायत्री, सैव सन्ध्या सावित्री च	१३
५१	"बाबा"-मन्दिरदक्षिणे श्रीकालभैरवः	१३
५२	तद्द्वारसमीपे अक्षयवटो मल्लादिदेवाश्च	१३
५३	"बाबा"-मन्दिरदक्षिणे कुबेरो हनूमानन्यदेवाश्च ..	१४
५४	तत्पश्चिमगा भगवती मनसा, तद्वामे मन्दिरगे श्रीलक्ष्मी-सरस्वत्यौ, तन्निकटे पूर्वाभिमुख-मन्दिरस्थो भगवान् सूर्यस्तदुत्तरे मन्दिरे पूर्वास्या बगलामाता च . ..	१४
५५	तदुत्तरे मन्दिरे पूर्वाभिमुखाः श्रीसीतारामलक्ष्मणाः तन्निकटे दक्षिणाभिमुखे मन्दिरे श्रीगङ्गा-यमुना सरस्वत्यादयः	१४
५६	तत्पार्श्वे पूर्वाभिमुखः श्री"आनन्द-भैरवः", तदन्तिके दक्षिणाभिमुखमन्दिरे श्रीगौरी-शङ्करौ, उत्तरस्यां नार्मद-शिवलिङ्गम् .. .	१५
५७	तन्निकटे दक्षिणाभिमुखमन्दिरस्था "तारा" भगवती ..	१५
५८	श्रीवैद्यनाथात् सौम्ये दक्षिणाभिमुखमन्दिरस्था श्रीमद्दक्षिणकालिका	१५
५९	श्रीमद्दक्षिणकालिकोपासकाः सिद्धाः	१७
६०	श्रीकालीमन्दिरतः पूर्वस्यां मन्दिरे माता "अन्न-पूर्णा" तत्पूर्वे पश्चिमाभिमुखमन्दिरस्थौ श्रीलक्ष्मी-	

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्रमसंख्या	विषयः			पत्राङ्क
	नारायणौ, तद्वाम्ये पश्चिमाभिमुखमन्दिरस्थः श्रीनीलकण्ठो भगवान् शनिग्रहश्च	..	..	१७
६१	"बाबा"-मन्दिरपूर्वद्वारकपाटे श्रीगणेशस्तदुत्तरे वृषभमूर्त्तयः।	..	..	१८
६२	देवगणैर्वन्द्यमानः श्रीवैद्यनाथः	..	..	१८
६३	ब्रह्मणो मन्दिरसमीपे मध्यमा घण्टा, कालभैरव-मन्दिरसविधे बृहती घण्टा, प्राङ्गणे चक्रन्तुलसी-स्थानमुत्तरस्याञ्चन्द्रकूपान्तिकं सिंहद्वारम्	..	..	१८
६४	शिवमन्दिर-प्राङ्गणा-गमागमहेतुकद्वारत्रयम्	..	..	१९
६५	चन्द्रकूपवर्णनम्	..	..	१९
६६	शिवगङ्गावर्णनम्	..	..	१९
६७	मालाकाराणां पुष्पमाल्य-बिल्वदलानि	..	..	१९
६८	शिवस्य वैशिष्ट्यम्	..	..	२०
६९	उच्चैर्महादेव-हर-शब्दोच्चारणम्	..	..	२०
७०	बम्बम्-महादेवोच्चारणम्	..	..	२०
७१	प्रभाते सरदारपण्डाद्वारा पूजनम, ततोऽन्यजनैः पूजनम्	..	..	२०
७२	पूजकब्राह्मणस्वरूपवर्णनम्	..	..	२०
७३	लोकसम्मर्दव्यस्तत्वेऽपि पूजार्थं जनोत्सुकता	..	..	२१
७४	वारं वारं श्रीवैद्यनाथस्पर्शनाय लोकयत्नः	..	..	२१
७५	गृहीतपूजोपसम्भारभक्ताः	..	..	२१
७६	"नमः शिवाय" मन्त्रजपान्मनोरथ-साफल्यम्	..	..	२१
७७	जपरताः शैवाः	..	..	२१
७८	राजानोऽधिकारिणो ज्ञानिनश्च पूजकाः	..	..	२२
७९	दण्डप्रणामवर्णनम्	..	..	२२
८०	ढोलवादकानां दृश्यम्	..	..	२२
८१	'धरना'दायकानां वृत्तम्	..	..	२३

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्रमसंख्या	विषयः	पत्राङ्काः
८२	प्रदोषे पूजासामग्रीसहितद्वारनिकटे समवेत-भक्तानां दृश्यम् ।	२३
८३	श्रीवैद्यनाथशिवसमीपे प्रसारितपूजोपचार-वेदध्वनिदृश्यम्	२३
८४	शिवलिङ्गे सुगन्धितैललेपनं शुद्धजलस्नानञ्च	२३
८५	वस्त्रखण्डैः शिवलिङ्ग प्रोञ्छणम् , चन्दनाक्षत-पुष्पसमर्पणम् । . ..	२३
८६	घामचन्दनार्पणं तन्माहात्म्यञ्च	२४
८७	बहुबिल्वपत्रपुष्पमाल्यैः शृङ्गाररूपस्योच्चकरणम्	२४
८८	तदुपरि पुष्पादिनिर्मितकिरीटकम् (मौरस्थापनम्) ..	२४
८९	शृङ्गारोपरि वस्त्रम्	२४
९०	धूपदीपनैवेद्यादिभिः पूजनम्	२४
९१	कर्पूरारार्त्तिकदृश्यम्	२५
९२	आरार्त्तिकान्ते करतलध्वनिः	२५
९३	जपः पुष्पाञ्जलिश्च	२५
९४	शृङ्गारशोभावर्णनम्	२५
९५	मयूरपिच्छव्यजनवातार्पणम्	२६
९६	अखण्डदीपः	२६
९७	प्रदोषे शङ्करगुणगायकादयः	२६
९८	वेदपाठकानां दृश्यम्	२६
९९	निशादौ शिवप्राङ्गणे गीतभजनादिदृश्यम्	२६
१००	शृङ्गारदर्शनमेलादृश्यम्	२७
१०१	रहस्ये दुग्धादिविशेषनैवेद्यम्	२७
१०२	प्रात्यहिकमन्दिरकपाटसम्पुटीकरणसमयः	२७
१०३	पण्डाजनानां स्वगृहगमनम्	२७
१०४	नित्यमागन्तुकानां पूजा	२८

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्रमसंख्या	विषया:	पत्राङ्काः
१०५	वसन्तपञ्चमीपूजा	२८
१०६	कामद (कामर) दृश्यम्	२८
१०७	शिवरात्रिपूजा	२६
१०८	महाशिवरात्र्युत्सवे चातुर्यामपूजनदृश्यम्	२६
१०९	महाशिवरात्रिमेलादृश्यम्	२६
११०	शिवविवाहदिने मन्दिरस्तूपे प्रचुरमौरदृश्यम्, रक्त-डोरकग्रन्थिबन्धदृश्यञ्च	३०
१११	श्रावणमासपूजा	३०
११२	अद्वितीयसुन्दरबिल्वपत्रप्रदर्शनम्।	३०
११३	अत्रत्यशुष्कचूर्णगलितबिल्वपत्राणामपि माहात्म्यम्	३१
११४	रुद्राभिषेकदृश्यम्	३१
११५	अहमहमिकाभावेन पूजासक्तजनदृश्यम्	३२
११६	पुत्रसुखाप्तिहेतुकानुष्ठानदृश्यम्	३२
११७	श्रीवैद्यनाथशिवपूजनादनेकशुभफलाप्तिः	३२
११८	भाद्रपदानन्तचतुर्दशीपूजा	३२
११९	श्रीदुर्गापूजा	३३
१२०	प्रत्येकपर्वपूजा	३३
१२१	अन्यतीर्थदेवापेक्षयाऽत्रत्यशिवस्य वैशिष्ट्यम्	३३
१२२	श्रीवैद्यनाथमाहात्म्यम्	३३
१२३	श्रीपार्वत्या माहात्म्यम्	३४-३५
१२४	अथात्रत्यशिवशासनविभागास्तत्र श्रीजगज्जननी-माहात्म्यम्	३५
१२५	श्रीगणेशमाहात्म्यम्	३५
१२६	श्रीब्रह्मणो माहात्म्यम्	३५
१२७	घण्टामाहात्म्यम्	३५
१२८	प्राङ्गणे घण्टाद्वयम्, शिवमन्दिरान्तःकोणेषु च घण्टिकाः	३६

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्रमसंख्या	विषयः	पत्राङ्काः
१२९	श्रीगायत्रीमाहात्म्यम्	३६
१३०	श्रीकालभैरवमाहात्म्यम्	३६
१३१	श्रीअक्षयवटमाहात्म्यम	३६
१३२	श्रीतुलसीमाहात्म्यम्	३७
१३३	श्रीहनुमतो माहात्म्यम्	३७
१३४	श्रीकुबेरमाहात्म्यम्	३७
१३५	श्रीमनसादेवीमाहात्म्यम्	३७
१३६	श्रीलक्ष्मीसरस्वतीमाहात्म्यम्	३७
१३७	भगवतः श्रीसूर्यस्य माहात्म्यम्	३८
१३८	श्रीवगलादेवीमाहात्म्यम्	३८-३९
१३९	श्रीसीतारामलक्ष्मणमाहात्म्यम्	३९
१४०	श्रीगङ्गायमुनादिमाहात्म्यम्	३९
१४१	श्रीआनन्दभैरवमाहात्म्यम्	३९
१४२	श्रीगौरीशङ्करमाहात्म्यम्	४०
१४३	श्रीनर्मदेश्वरमाहात्म्यम्	४०
१४४	श्रीतारामाहात्म्यम्	४०
१४५	श्रीमहाविद्याकालिकामाहात्म्यम	४०-४ -४२
१४६	श्रीअन्नपूर्णामाहात्म्यम्	४२
१४७	श्रीचन्द्रकूपमाहात्म्यम्	४३
१४८	श्रीलक्ष्मीनारायणमाहात्म्यम्	४३
१४९	श्रीनीलकण्ठमाहात्म्यम्	४३
१५०	श्रीशनिग्रहमाहात्म्यम्	४३
१५१	श्रीवसहाख्यवृषभमाहात्म्यम्	४४
१५२	श्रीसुदर्शनचक्रमाहात्म्यम्, अन्य देवतामाहात्म्यम्	४४
१५३	श्रीस्वर्णविल्वेश्वरशिववर्णनम्	४४-४५
१५४	श्रीवैजूनाथशिववर्णनम्	४५
१५५	श्रीतपोवनवर्णनम्	४५

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्रमसंख्या	विषयः	पत्राङ्कः
१५६	श्रीनन्दनपर्वतवर्णनम्	४५
१५७	श्रीहरलाजोड़ीवर्णनम्	४६
१५८	श्रीत्रिकूटाचलवर्णनम्	४६
१५९	पञ्चक्रोशपरिक्रमावर्णनम् .. .	४६
१६०	श्रीवासुकिनाथतीर्थवर्णनम् तन्माहात्म्यञ्च	४७
१६१	श्रीजह्नुमुनिस्थानस्थगङ्गाशिव-वर्णनम्	४७
१६२	बाबाश्रीअजगैवीनाथवर्णनम्	४८
१६३	श्रीवैद्यनाथतीर्थस्था वर्णनीयाः पण्डाजनाः, ... तत्र वर्त्तमान-सरदारपण्डावर्णनम्	४८
१६४	अथान्यपण्डाजनवर्णनम् ..	४८-४९-५०
	अत्रत्य एव सदाचारपवित्रो धार्मिकवरो देशोत्थानकार्य परायणो बिहार-राज्य-मुख्य-मन्त्री महामनाः पण्डित श्री विनोदानन्द झा शर्मा	४९
१६५	श्रीवैद्यनाथतीर्थे ब्रह्मीभूता महात्मानः	५०
१६६	अत्रान्येऽपि कतिविधमहात्मानो बभूवुः	५१
१६७	अत्र मन्दिरे नूतनमाश्चर्यदृश्यम्	५१
१६८	अथ श्रीवैद्यनाथशिवध्यानम्	५१
१६९	श्रीवैद्यनाथशिवस्तुतिः	५२ तः ६५ पर्यन्तम्
१७०	उपसंहृतिः	६६
१७१	ग्रन्थरचनासमाप्तिकालः	६६
१७२	ग्रन्थपूर्त्तिहेतुकप्रणामः	६६
१७३	ग्रन्थकर्त्तृपरिचयः	६७-६८
१७४	शुद्धिपत्राणि	६९-७२

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्राक्किञ्चिन्निवेदनम्

गणेशकार्त्तिकेयाभ्यां सुप्रसन्नं सुरेश्वरम् ।
पार्वतीभूषितन्देवं वैद्यनाथं शिवं भजे ॥१॥

श्रीमच्छङ्करवैद्यनाथकृपया स्वान्ते मदीये हठात् ।
जातेयं शुभभावना हि यदहं श्रीवैद्यनाथस्य सत् ॥
सम्वन्धे सकलेतिहासविषयान् नानाविधैरुत्तमैः ।
छन्दोभी रचयेयमाशु भगवद्गौरीपतेः प्रीतये ॥२॥

श्रीभारतीयजनसम्मतराष्ट्रपस्य
राजेन्द्रनामकबुधस्य सुदेववाण्याम् ।
वंशप्रशस्तिरचनां कृतवानहं प्राक्
किन्त्वद्य सच्छिवप्रशस्तिमिमां करोमि ॥३॥

श्रीवैद्यनाथस्य शिवस्य साध्वी
कथा ह्यनन्ता मुनिभिस्त्वगम्या ।
अल्पज्ञबालोऽस्मि कथं प्रकुर्य्यां
सुवर्णनं विश्वपतेरमुष्य ॥४॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तथाऽपि सत्कामदशङ्करस्य
कृपाबलेनाहमिहातिनम्रः ।
श्रीवैद्यनाथस्य शिवस्य गाथाऽ-
भिवर्णनं कर्त्तुं महो प्रवृत्तः ॥५॥

रचयितुं शिवपुस्तकमुत्तमं
शिवकृपैव हि कारणमस्ति तत् ।
नहि च काऽपि ममात्र विशेषता
जगति सा कविता शिवशक्तिजा ॥६॥

सञ्चलतः स्खलनमाशु भवत्यवश्यं
लोके प्रमादवशतस्तदिहावलोक्य ।
कुर्वन्ति दुर्जनजनाः परिहासमुच्चं
सत्साधवो विदधते च सहानुभूतिम् ॥७॥

श्रीवैद्यनाथगिरिजेशसुभक्तिवृद्ध्यै
श्रीशङ्करीप्रभृतिराजिविराजितस्य ।
श्रीवैद्यनाथभगवद्धरशङ्करस्य
श्रीकालिकासुकृपया विदधे प्रशस्तिम् ॥८॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

काव्यस्यास्य विराजितस्य रचनाकार्ये मदीये वरे
सद्बुद्ध्यल्पतया च कण्टकगताद्दोषात् त्रुटिर्या मम ।
क्षन्तव्या गुणपक्षपातनिरतैरुच्चाशयैः सज्जनै-
रेतन्मे विनिवेदनं सविनयं विद्यावतामग्रतः ॥९॥

ग्रन्थेऽस्मिञ्छुभकामनाञ्च ललितां स्वां सम्मतिं भूमिकां
पाण्डित्यान्वितसुन्दरैः सुवचनैर्भावैर्विशिष्टैर्वृताम् ।
सम्मान्या गुणशालिनोबुधवराः श्रद्धान्विता येऽलिखन्
तेभ्यो ह्यात्मकृतज्ञतां विशदयन् सद्धन्यवादान् ददे ॥१०॥

शैलाधिराजतनयापरिशोभितस्य
श्रीवैद्यनाथभगवद्वरशङ्करस्य ।
सत्पुस्तकं यदि पठेयुरिदं हि लोका
वेत्स्याम्यहं श्रममिमं सफलन्तदैव ॥११॥

श्रीकालिकाभगवतीशुभपादपद्मं
स्वान्ते निधाय शिवसौम्यकथासुमाल्यम् ।
भक्त्युद्गतं सुविनयान्वित-"विष्णुकान्तो"
ग्रथ्नाति वृत्तनिचयैः सुर-वाङ्मयैस्तैः ॥१२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ॐ भगवते रावणेश्वराय श्रीवैद्यनाथाय शङ्कराय नमः ।

"श्रीवैद्यनाथशिवप्रशस्तिः"

तपस्विरावणे शिवप्रसन्नता :—

त्रेतायां शिवभक्तिमग्नहृदयो लङ्कापती रावणः
कैलासं गिरिमेत्य शङ्करकृते चक्रेऽतिघोरन्तपः ।
तद्दृष्ट्वा भगवान् हिमाचलसुतानाथः प्रतुष्यन् मुहुः
कामं प्रार्थयितुं जगाद रुचिरं भक्ताय तस्मै द्रुतम् ॥ १॥

लङ्कागमनाय रावणस्य प्रार्थना :—

ततः परं शङ्करभक्तरावणः सम्प्रार्थयामास सुमानिताथः ।
लङ्कागमायार्च्यधनेशमित्रं सत्कामदन्तं शिवमाशुतोषम् ॥२॥

लङ्कागमनाय शिवप्रवृत्तिः पार्वत्याश्चिन्ता च :—

लङ्केश-भक्त्या परमो हि प्रीतः कैलासतः शङ्कर एष सद्यः ।
लङ्कां परां गन्तुमहो प्रवृत्तः सुचिन्तिताऽभूभ्नगकन्यकाऽतः ॥३॥

पार्वत्या रावणाय पेयजलदानम् :—

प्रोवाच माता गणनायकस्य देवाधिपन्नो गमनाय लङ्काम् ।
पातुन्तथाऽदाच्छिवसेवकाय तस्मै रहस्यं जलमङ्गतन्तत् ॥४॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पार्वत्याश्चेष्टया शिवप्रतिज्ञा :—

ततोऽम्बिकाबोधितभूतनाथो जगाद लङ्कापतये मुदा सः ।
कुत्रापि मध्ये मम लिङ्गमेतन्नो स्थापनीयन्त्विति मत्प्रतिज्ञा ॥५॥

शिवकृततत्स्वलिङ्गफलाभिधानम् :—

इदं हि लिङ्गं मम रूपमास्ते सर्वार्थसिद्धिप्रदमाशुतोषम् ।
सत्कामनापूरकमुच्चमुग्रं भयापहं भक्तसुरक्षकन्तत् ॥६॥
हे भक्त ! सौम्यं मम लिङ्गमेतद् ये पूजयिष्यन्ति सुभक्तिभावैः ।
धर्मार्थकामानपवर्गयुक्तान् प्राप्स्यन्ति ते मत्कृपया समग्रान् ॥७॥

मध्ये शिवलिङ्गस्य नो स्थापनाय रावणस्य स्वीकृतिः ।

श्रुत्वेतिवाक्यं मुदितो वलिष्ठः स रावणो द्राङ्निजगाद देवम् ।
कुत्रापि मध्ये वरदस्य लिङ्गन्नो स्थापयिष्यामि वचस्त्वदम्मे ॥८॥

रावणद्वारा शिवलिङ्गोत्थापनम् :—

तथाऽस्तु शम्भोरमृतायमानं वचो निशम्यामरशत्रुरेपः ।
स्वमस्तके शङ्करलिङ्गमुच्चं संस्थाप्य हर्षं परमाजगाम ॥९॥

रावणस्य लङ्कागमनारम्भः —

ततस्तु नीत्वा शिवलिङ्गमुत्तमं प्रसादयंस्तैः शुभसामगानैः ।
लङ्कां प्रगन्तुं मतिमाशु चक्रे महाबलिष्ठः सफलात्मतत्त्वः ॥१०॥

देवानाश्चिन्ता —

तदुरावसेन्द्रेण सुनीयमानं लङ्काकृते वीक्ष्य सुरास्तदानीम् ।
प्रचिन्तयामासुरतो हि दैत्या नः पीडयिष्यन्ति वरप्रमत्ताः ॥११॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रावणस्य लघुशङ्कोद्वेग :—

कैलासतो दैत्यपतिर्यदैव दूरं कियन्मार्गमगात्तदा सः ।
प्रपीडितोऽभूल्लघुशङ्कयेति प्रारब्धप्राधान्यमिहास्ति चित्रम् ॥१२॥

लिङ्गमिदन्नो स्थाप्यन्तदर्थन्तस्य युक्तिनिरूपणम् :—

लङ्काऽऽगमात् पूर्वमिदं सुलिङ्गं कुत्रापि नो स्थाप्यमतो हि भूयः ।
किमत्र कर्तव्यमिति प्रयुक्तिर्विचारिता तेन महाबलेन ॥१३॥

विष्णुरूपिणो विप्रस्याऽऽगमनम् :—

ततः परं दैवसुमायया वै सद्-विप्ररूपो भगवान् हरिः सः ।
तद्रात्तसेन्द्राच्छिवमोचनाय समाययौ दैत्यपतेः समक्षम् ॥१४॥

विप्रं प्रति शिवलिङ्गग्रहणाय रावणस्य विनयो विप्रेण शिव-लिङ्गग्रहणञ्च :—

स व्यग्रचित्तो लघुशङ्कया तच्छिव-प्रतिज्ञा भयतोऽपि सद्यः ।
पुरः स्थितं विप्रवरं निरीक्ष्य चकार नम्रं विनयन्तु दैत्यः ॥१५॥

हे पूज्य ! विप्रवर ! लिङ्गमिदं गृहाण
यावच्छुचिर्द्रुतमहं प्रभवामि तावत् ।
तच्छम्भुभक्तमधुरं वचनं निशम्य
जग्राह भव्यभवलिङ्गमिदं स विप्रः ॥१६॥

रावणस्य मूत्रत्यागे विलम्बः, शीघ्रकरणाय विप्रोक्ति :—

ततश्चिरं मूत्रविसर्जनेन प्रयापयामास तदा क्षणं सः ।
लिङ्गस्य भारं गुरुमादधानः प्रोवाच विप्रः कुरु सत्वरं भोः ॥१७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विप्र-द्वारा हरीतक-वने सत्या हृदये तच्छिवलिङ्गस्य स्थापनम्:-

शौचात्तस्य निवर्त्तनेऽतिसमयं संवीक्ष्य विप्राकृतिः
श्रीविष्णुः शुभहार्दपीठ इह सत्स्थाने समीपस्थिते,
यत्रासीद्विपुलं हरीतकवनं श्रीवृत्तसङ्घावृतं
तत्राम्बा-हृदये निधाय तरसा सोऽन्तर्दधे तं शिवम् ॥१८॥

श्रीवैद्यनाथनामकरणे हेतु :—

सुविप्ररूपधारिणा रमाप्रियेण विष्णुना
हिमात्मजापतेरभूद् विलक्षणन्तु मेलनम् ।
तदैव देववैद्यकौ शिवार्चनं प्रचक्रतु-
स्ततोऽस्य "वैद्यनाथ"-नाम विश्रुतञ्जगत्यभूत् ॥१९॥

श्रीहार्दपीठविवरणम् :—

शिवेन सत्या दिवि नीयमानान्यङ्गानि भूमौ पतितानि यत्र ।
तत्राभवत् सिद्धसुपीठमुग्रन्तन्मन्त्रयागादिकसिद्धिहेतोः ॥२०॥
अत्र स्थले प्राग्घृदयं पपात सत्या ह्यतो हार्दकपीठमाहुः ।
महर्षयस्तेन तदत्र लिङ्गं संस्थापयामास शिवस्य विप्रः ॥२१॥

शिवोपरि देवकृता पुष्पवृष्टि :—

अथेह तं शङ्करमाशुतोषं दृष्ट्वा सुरा जग्मुरतीव हर्षम् ।
सुपुष्पवृष्टिञ्च वरप्रदेऽस्मिञ्छिवे परं चक्रुरहो विमानात् ॥२२॥

शौचनिवृत्तरावणस्याग्रिमकृत्यचिन्तनम् :—

लङ्केशमूत्रैः समभूत्तडागो योऽद्यापि लोकैर्विदितो विशिष्टः ।
'दैवात्ततः शौचनिवृत्तकायः स चिन्तयामास तदाग्रकृत्यम्' ॥२४॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रावणद्वारा स्नानाय पुष्करिणीनिर्माणम् :—

अनन्तरं पुष्करिणीं स भक्तो निर्माप्य रम्यां शिवपूजनाय ।
आवाह्य तीर्थानि च तत्र सम्यक् स्नानञ्चकारात्मविशुद्धिहेतोः ॥२५॥

लोके "शिवगङ्गा" इतिनाम्ना तत्प्रसिद्धि :—

ततः समारभ्य शिवेतिपूर्वा गङ्गा प्रसिद्धा भुवि राजमाना ।
अद्यापि गौरीपतिपूजनाय स्नानं प्रकुर्वन्ति नरास्तु यत्र ॥२६॥

रावणद्वारा कूपनिर्माणम् :—

पूजावारिनिमित्तकं पशुपतेरैशानकोणे द्रुतं
कूपं स्वादुपयोधरं शिवमना निर्माय सौम्यन्ततः ।
गत्वा चन्द्र-सुलोकमुत्तमसुधाश्चानीय चिक्षेप सत्
सोऽस्मिञ्छङ्करकूपकेऽतिमतिमान् भक्तो महान् रावणः ॥२७॥

"चन्द्रकूप"-नामकरणे कारणम् :—

चन्द्रामृतस्थापनयैव लोकास्तञ्चन्द्रकूपं कथयन्ति सौम्यम् ।
अद्यापि यस्याम्बुभिराशुतोषन्तदङ्गदेवाँश्च जना यजन्ति ॥२८॥

रावणद्वारा विधिवच्छिवार्चनं प्रार्थना च :—

भक्त्याऽसौ बलपुञ्जभृत्सुररिपुः पूजोपचारांस्तथा
तत्पीयूषसमं परं प्रियजलं सचन्द्रकूपोद्धृतम् ।
नीत्वा, कामदलिङ्गशङ्करममुं सम्पूज्य भक्त्या, ततो
दिव्यैः संस्तवनैर्मुहुः पशुपतिं सम्प्रार्थयामास तम् ॥२९॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रावणे शिवप्रसन्नता, रावणनामोच्चारणानन्तरं मन्नामं ग्रहीष्यन्ति लोका इति शिवोक्ति :—

तदाऽऽशुतोषो निजभक्तरावणोऽत्यन्तं सुतुष्टो निजगाद कामम् ।
अतः परं प्राक् तव नाम नीत्वा मन्नाम नेष्यन्ति सदा हि लोकाः ॥३०॥

अस्य लिङ्गस्यार्चने रावणेश्वर-पदस्य प्राथमिकता तत्फलञ्च :—

श्रीरावणेश्वरपदं प्रथमं सदुक्त्वा
पश्चात्तु नाम मम ये ह्यभिधाय लोकाः ।
दास्यन्ति पूजनममुष्य सुलिङ्गकस्य
प्राप्स्यन्ति ते सकलवाञ्छितकामसिद्धिम् ॥३१॥

पुनस्तच्छिवलिङ्गं लङ्कां गमयितुं रावणस्य प्रयत्नः, शिवस्य तदर्थमप्रवृत्तिः—

ततः प्रीतं दृष्ट्वा पशुपतिमिमं भक्तिभरितः
स लङ्कां तं शम्भुं गमयितुमहो यत्नमतनोत् ।
प्रतिज्ञाबद्धोऽसौ गिरिपतिसुतेशः शिव इतः
परां लङ्कां गन्तुं नहि खलु बभूवोद्यतमनाः ॥३२॥

शिवलिङ्गमुत्थापयितुं रावणस्य बलप्रयोगस्तद्वैफल्यम् :—

उत्थापयामास तदाऽशु लिङ्गं बलप्रमत्तो हि स रावणस्तत् ।
किन्तु प्रयत्नं विफलं स्वकीयं निरीक्ष्य तं विस्मयमाजगाम ॥३३॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रावणाङ्गुष्ठेन तल्लिङ्गस्य भूमाववनामनम्, लज्जितरावणस्य लङ्कापरावर्त्तनम् —

क्रुद्धस्ततोऽसौ बलवाँस्तु दैत्योऽङ्गुष्ठेन लिङ्गं विनिपीड्य भूमौ
तदैव दुःखेन ययौ सलज्जो लङ्कां परामात्म-सुराजधानीम् ॥३४॥

तच्छिवलिङ्गे रावणाङ्गुष्ठचिह्नमद्यपर्यन्तम्—

अद्यापि चिह्नन्तदतिप्रकाशं विभाति कृष्णे शुभशम्भुलिङ्गे ।
सुपूर्णचन्द्रस्य यथा हि लक्ष्म प्रद्योतते लोकमनोऽभिहारि॥३५ ॥

पार्वत्यास्तत्र समागमः—

श्रीहार्दपीठे निवसन्तमीशं ज्ञात्वा तु कैलासगिरिं विहाय ।
हिमात्मजा पत्यनुगामिनी सा समाजगामात्मपतेः समक्षम् ॥३६॥

भारतवर्षस्य पूर्वोत्तरभागे श्रीवैद्यनाथः शङ्कर :—

पूर्वोत्तरे भारतवर्षदेशे कैलासवासी गिरिजासमेतः ।
पुण्यस्थले हार्दसुपीठकेऽत्र श्रीवैद्यनाथो हि विराजते सः ॥३७॥

ततोऽन्यदेवतानिवासारम्भ :—

ततः क्रमाच्छङ्कर - शासनस्य प्रख्यातिहेतोर्वरदेवतास्ताः ।
समेत्य वासं सुखमत्र चक्रुस्ततो ह्यभूत्तीर्थप्रसिद्धिरस्य ॥३८॥

देवमन्दिराणां निर्माणम् —

ततः क्रमाच्छङ्करमन्दिरं सद् गौर्य्यादिकानामपि मन्दिराणि ।
विनिर्मितान्याशु, बभूवुरत्र भव्यान्यपूर्वाणि चमत्कृतानि ॥३९॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भगवतो वैद्यनाथस्य मन्दिरं विश्वकर्मणा निर्मितम् —

अत्रत्यसन्मन्दिरमुन्नतन्तद् गौरीपतेर्विश्वसुकर्मणैव ।
विनिर्मितं साधु पुरातनानां मतन्त्विदं लोकप्रसिद्धमस्ति ॥४०॥

तीर्थमन्दिरयोर्विशिष्टता :-

तीर्थं श्रीगिरिजापतेर्भगवतः सद्वैद्यनाथाख्यकं
श्रेष्ठं भारतवर्षकेऽस्ति विमलं पुण्यावहं विश्रुतम् ।
यत्रानेकसुमन्दिराणि परितो देदीप्यमानानि च ।
मध्ये पद्ममिवाद्भुतं विजयते तन्मन्दिरं प्रोन्नतम् ॥४१॥

पार्वतीश-मन्दिर-ग्रन्थिबन्धवर्णनम् :—

एतन्मन्दिरमद्भुतं हि परितो दृश्ये समानं परं
स्तूपे यस्य विराजमानकलशात् प्रोद्यत्त्रिशूलान्वितात् ।
लम्बै-रक्तमयैः सुडोरकचयैः सद्ग्रन्थिवन्धः शुचिः
सौम्येनाचलकन्यकामठशिरः स्थानेन लग्नोऽस्ति यः ॥४२॥

विततमुद्गतमन्द्रधनुर्यथा परमलङ्कुरुते विशदान्दिवम् ।
इह तथा गिरिजाशिवगेहयो-र्लगितरक्तसमुच्छ्रितडोरकम् ॥४३॥

श्रीवैद्यनाथस्य पद्माकारमन्दिरसौन्दर्यवर्णनम्—

उत्फुल्लं सरसिच्छविं विशदयत् पद्मं यथा द्योतते
तद्रूपेण प्रशस्तभूस्थितमहो दीर्घं सुरम्यं महत् ।
देवानां हितदं परं प्रमहितं श्रीहार्दपीठे स्थितं
दिव्यं मन्दिरमत्र भाति भगवच्छ्रीवैद्यनाथस्य सत् ॥४४॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"श्रीवैद्यनाथशिवप्रशस्तिः"

मन्दिरशिखरस्थसुवर्णकलशत्रिशूलवर्णनम् :—

श्रीगौरीपतिसन्मठस्य शिखरे हेम्नस्त्रिशूलन्तथा
शोभाढ्यःकलशोऽत्र राजति चिरं दृश्योऽद्भुतो यो हि सः ।
आकाशे परिपूर्णचन्द्र उदितो विद्योतमानो यथा
तद्वद्भाति विशिष्ट एष कलशो दीव्यत्त्रिशूलन्तु तत् ॥४५॥

श्रीशिवलिङ्गस्य सौन्दर्यादिवर्णनं कामदफलञ्च :—

भव्यं लिङ्गं हि गोलं नयनसुरुचिरं वैद्यनाथस्य शम्भोः
प्राच्यामैशानभागे नतमतिशुभदं, याम्यभागे प्रतीच्याम् ।
वायव्ये चोन्नतं, यन्नुतममरगणैरद्भुतं शोभमानं
भक्तानामिष्टदोहं प्रजयति महिते हार्दपीठे स्थितं तत् ॥४६॥

नीलेऽनन्त-नभस्युदेति भगवाँश्चन्द्रः सुवृत्ताकृतिः
सोऽयश्चन्द्र - धरस्तथाऽसितमये पाषाणयन्त्रासने ।
दीव्यद्राजतिकेन वर्तुलसमाकारेण संवेष्टितो
भक्तानां वरदः सदा विजयते श्रीवैद्यनाथः शिवः ॥४७॥

श्रीमत्कामद-वैद्यनाथसुविभोर्लिङ्गन्नतं पूर्वतो
मन्येऽसावुचितङ्करोति शुभदः श्रीपार्वतीशो मुदा ।
यस्मात् कामदलिङ्गतो भगवतः पूर्वे स्थिता साऽम्बिका
तस्याश्चाभिमुखे स्थितः शिव इति प्रोच्चे विराजत्युमा ॥४८॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अन्यच्चापि मतं तदेतदुचितं यच्चन्द्रमूर्ध्नः पुरा
सौम्ये पाणिपरिग्रहस्य समये श्रीमन्नगेशालये ।
गायन्त्यः समुपागताः स्त्रिय अहो प्रोचुस्तदानीमिदं
वृद्धो भाति वरस्त्वसाविति शिवः शृण्वन्नतोऽभूद्धिया ॥४६॥

देवानामरिसूदनाय निरतः शूली त्रिलोकाधिप—
स्त्रैलोक्याद्भुतभारभृत् त्रिजगतां रक्षां प्रकुर्वन्नसौ ।
भक्ताभीष्टफलप्रदस्तु सततं दुःखान्तकृच्छङ्करोऽ-
लैतावद्-गुरुभारकोद्वहनतो भूताधिपोऽभून्नतः ॥५०॥

रजतवर्त्तुलाकारेण लिङ्गस्य सौन्दर्यं तत्स्पर्शे भयनिवृत्तिहर्षौः—

श्रीकैलासनिवासिनो भगवतो गङ्गाधरस्याद्भुतं
लिङ्गं भक्तभयापहं शुभकरं सत्कामनापूरकम् ।
दृश्ये यद्रुचिरं महत् सुरजतेनावेष्टितं वर्त्तुलं
स्पर्शे हर्षविवर्धनं जयति तच्छ्री-वैद्यनाथाख्यकम् ॥५१॥

शिवलिङ्गस्य कृष्णत्वे हेतुः—

आद्याऽम्बां श्यामवर्णामभयवरकरां मुण्डमालाभिरामां
खड्गं मुण्डन्दधानां सुललितरसनां दिक्सुवस्त्रां प्रणम्याम् ।
दृष्ट्वा श्रीचन्द्रमौली रजतगिरिनिभां सच्छविन्तान्धरन्तसन्
वर्णे कृष्णत्वमापत्तत इह भगवद्-वैद्यनाथाख्यलिङ्गम् ॥५२॥

Dr. Urmila Sharma Collection,.Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

देवेन्द्रवदस्य शिवस्य शोभा, पार्श्वस्थिता देवताश्च—

यद्वद् देवपुरे शचीपतिरसौ वृन्दारकैः शोभते
तद्वच्चात्र सुतीर्थगोऽतिलसितो देवैरनेकैः शिवः ।
श्रीमद्दक्षिण-कालिकाऽथ बगला-गौर्यन्नपूर्णादयः
सन्त्यस्याखिललोकरक्षणपराः पार्श्वस्थिता देवताः ॥५३॥

श्री वैद्यनाथशिवसम्मुखस्थितदुर्गा—

पूर्वे तस्य शिवस्य सम्मुखगता सन्मन्दिरस्था परा
लोकाम्बा महिषासुरप्रमथनी सिंहाधिरूढा स्तुता ।
या दारिद्र्यविशेषकष्टहरणी सर्वार्थसंसाधनी
सा ज्ञानामृतदायिनी विजयते दुर्गा सुरैर्वन्दिता ॥५४॥

तत्रैव त्रिपुरसुन्दरी पार्वती—

साकं तयैव त्रिपुरेतिपदेन युक्ता
या सुन्दरी सुरसुसेवितपादपद्मा ।
सा शङ्कर-प्रियतमाऽखिल-लोकमाता
श्री-पार्वती विजयते शुभदा प्रशस्ता ॥५५॥

महामहिमधारिणी शिवा त्रिपुरसुन्दरी
सदा शिवविमोहिनी स्वभक्तजनपालिनी ।
प्रशस्त-भाग्यदायिनी भवभयापहारिणी
जयति लोकपावनी जयति शम्भुगेहिनी ॥५६॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भक्तानां भयभेदिनी भगवती भद्रा भवोद्भाविनी
भास्वद्भानुप्रभा सुभासितविभा भ्राजद्विभूषाभरा ।
भूदेवोद्धरणी विभूतिभरिता भव्या भवानी शुभा
भव्यैर्भाग्यभरैर्भुवं हि भरति प्रोद्भासमानाऽभया ॥५७॥

शिवसम्मुखमठे सैव गौरी दुर्गासहिता, तद्दक्षिणस्यां मन्दिरस्था नानादेवताः, जगज्जननी च :—

या गौरीनगकन्यका त्रिपुरिका सा सुन्दरी सम्मता,
दुर्गा तत्र च राजते भयहरा श्रीवैद्यनाथाग्रतः ।
तद् याम्ये जगतां स्थिताऽत्र जननी या देवसङ्घैर्वृता
सा पूज्या वरदा विराजति सदा सृष्टिप्रदा संस्तुता ॥५८॥

तत्पश्चिमे उत्तराभिमुखमन्दिरस्थो गणेश :—

तत्पश्चिमे स्थितगजानन एष नित्यं
विघ्नान् निहन्तुमिह प्रोद्यत आखुसंस्थः ।
गौरीसुतो गणपतिः शुभसिद्धिदाता
माङ्गल्यमाशु तनुते शिवभक्तिहेतोः ॥५९॥

तत्पश्चिममन्दिरे ब्रह्मा :—

विघ्नेशात् पश्चिमस्थो लघुभवनगतः सर्वलोकैकधाता
ब्रह्माण्डोत्पत्तिकर्त्ता निखिलनियतिकृद्देवर्यो विशिष्टः ।
यज्ञादावाहुतिन्तां प्रथमत इह यः सम्प्रगृह्णाति पूतां
गीर्वाणज्येष्ठ एषस्तुतशुभमतिदो राजते श्रीविरिञ्चिः ॥६०॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तस्मात् प्रतीच्यां मन्दिरस्था गायत्री, सैव सन्ध्या सावित्री च :—

तत्पार्श्वे पश्चिमेऽत्रामरगणमहिताऽऽदित्यतेजःस्वरूपा
गायत्री वेदमाता मुनिनिचयनुता ब्रह्मसद्बोधकर्त्री ।
सावित्री सैव वर्ण्या त्रिदिवसुखकरी सुप्रकाशात्मिका या,
सा सन्ध्या लोकमान्या प्रजयति नितरां ब्राह्मणैःस्तूयमाना॥६१॥

"बाबा" मन्दिरदक्षिणे श्रीकालभैरव :—

"बावा" मन्दिर-दक्षिणेऽतिवरदो भक्तार्त्तिहारी सदा
लोकत्रासनिवारको बहुदयायुक्तोऽत्र रक्षाकरः ।
उग्रः शङ्करतीर्थशासनधरः सर्वार्थसिद्धिप्रदः
श्रीशम्भोः प्रिय एष राजतितरां श्रीकालभृद्भैरवः ॥६२॥

श्रीकालभैरव इहातिशुभेष्टकृद्यः श्री-शङ्करप्रियतमो जगदेकपालः ।
श्रीपार्वतीशचरणाम्बुजपूजकानां श्रीसम्पदो वितनयन् सुविराजतेऽसौ ॥६३॥

तद्द्वारसमीपे अक्षयवटो मल्लादिदेवाश्च :—

नित्यन्तस्य सुभैरवस्य भवने तत्पूजकैः सत्तमै-
र्दीव्यद्भैरवदर्शनेन मुदितैर्यैः सत्पराध्युत्यते ।
द्वारात् पश्चिमसंस्थितोऽक्षयवटो मल्लौ च भित्तिस्थितौ
पूज्येतेऽत्र जनैस्तदा हि मनसा पुण्याप्तिकामाय तैः ॥६४॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"बाबा" मन्दिरदक्षिणे कुबेरो हनूमानन्यदेवाश्च :—

श्रीकैलासपतेरमुष्य विभवानारक्षितुं दक्षिणे
तिष्ठत्यत्र धनेश एष विदितः सोऽयं कुबेराख्यकः ।
अन्यैर्देवगणैर्वृ तश्च भगवच्छ्रीरामभक्तो महा—
वीरः श्रीहनुमानसौ विजयते यो भक्तरक्षापरः ॥६५॥

तत्पश्चिमगा भगवती मनसा,
तद्वामे मन्दिरगे श्रीलक्ष्मी-सरस्वत्यौ,
तन्निकटे पूर्वाभिमुख-मन्दिरस्थो भगवान्
सूर्यस्तदुत्तरे मन्दिरे पूर्वास्या बगला माता च :—

तस्मात् पश्चिमगा विभाति "मनसा देवी" मनोऽभीष्टदा,
तद्वामे निकटस्थिता भगवती "श्री शारदा सेन्दिरा" ।
पूर्वाशाभिमुखो हि तत्र भगवानारोग्यदाता "रविः",
तत्पार्श्वे विजया विभाति "बगला" माताऽत्र कल्याणदा ॥६६॥

तदुत्तरे मन्दिरे पूर्वाभिमुखाः श्रीसीतारामलक्ष्मणाः :—
तन्निकटे दक्षिणाभिमुखे मन्दिरे श्रीगङ्गायमुनासरस्वत्यादयः :—

एवं "लक्ष्मण" संयुतोऽत्र भगवान् सीतापती "रामकः"
शम्भोर्भक्ति-विधायको भुवि मतो मोक्षप्रदो भासते ।
"श्रीगङ्गायमुनादिदेव्य" इह या दुर्बोधपापापहा
द्योतन्ते निकटे हि तस्य गिरिजाजानेः प्रियत्वं गताः ॥६७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तत्पार्श्वे पूर्वाभिमुखः श्री "आनन्द-भैरवः", तदन्तिके दक्षिणाभिमुखमन्दिरे श्रीगौरीशङ्करौ, उत्तरस्यां नार्मदशिवलिङ्गम् :—

तत्प्रान्ते समलोकरक्षणपरश्चानन्दकृद् - "भैरवः"
देवो यत्र विराजतेऽतिमहिमा श्रीवैद्यनाथप्रियः ।
एवन्तन्निकटे वसत्यविरतं सार्धन्तु गौर्या "शिवः"
सौम्ये "नार्मदशम्भुलिङ्ग"-मपि तद् भातीह शुभ्रं परम् ॥६८॥

तन्निकटे दक्षिणाभिमुखमन्दिरस्था तारा भगवती:—

शम्भोर्मन्दिरसौम्यसद्दिशिगता सुश्वेतवर्णप्रभा
ब्रह्मानन्दमयी सदा सुरनुता दुर्ज्ञानपापापहा ।
लोकाँस्तारयति स्मृताऽपि महिता संसारदुःखाब्धितः
सेयं तारणतत्परा विजयते "तारा"ऽत्र मोक्षप्रदा ॥६९॥

श्रीवैद्यनाथात् सौम्ये दक्षिणाभिमुखमन्दिरस्था श्रीमद्दक्षिणाकालिका:—

श्रीमच्छङ्करवैद्यनाथभवनात्सौम्ये चिरस्थाऽर्चिता
चञ्चत्खड्गमथारिमुण्डमपि याऽभीतिं वरं सत्करैः ।
सन्धत्ते प्रमुदा सदाशिवहृदि प्रोत्तिष्ठमानाऽम्बिका
सा "श्रीदक्षिणकालिका" विजयते सिद्धिप्रदाऽऽद्या स्तुता ॥७०॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"श्रीवैद्यनाथशिवप्रशस्तिः"

माता सृष्टिसमुद्भवाय जगतां रक्षार्थमेषा पिता
विश्वोत्पत्तिकृते विधिः स्थितिविधौ विष्णुर्लये शङ्करः ।
आत्मा प्राणभृतां बलं बलवतां संसारशक्तिः परा
देवेन्द्रादिसुरैर्नमस्कृतपदा सा "कालिका" राजते ॥७१ ॥

गीर्वाणवृन्दाः सुमहर्षयश्च यां सत्परां शक्तिमुपासते स्म ।
सा "दक्षिणा श्रीयुतकालिका"ऽत्र विराजते भक्त-विवृद्धिहेतोः ॥७२॥

श्रीसूर्यमण्डलसुमध्यगतां महोग्रा-
ञ्चैतन्यशक्तिनिलयां परमोद्यतान्ताम् ।
दिव्यां वराभयशिरः - शुभखड्गहस्तां
नित्यान्तु रक्तरसनां प्रणमामि "कालीम्" ॥७३॥

श्रीमत्करालवदनां सुविमुक्तकेशीं
श्रीशङ्करस्य हृदये सुविराजमानाम् ।
सत्खड्गमुण्डवरकानभयं कराब्जैः
संबिभ्रतीं भगवतीमिह नौमि "कालीम्" ॥७४॥

भक्तार्त्तिनादमधिगम्य कृपाणहस्ता
छित्त्वा स्वभक्तजनदुःखशिरो हि सद्यः ।
सैषा परा तु निजसेवकपालनाय
धत्तेऽभयं वरमहो शुभदाऽत्र "काली" ॥७५॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"श्रीवैद्यनाथशिवप्रशस्तिः"

श्रीमद्दक्षिणकालिकोपासकाः सिद्धाः :—

देवर्षिप्रमुखैः स्तुतान्त्रिनयनां धर्मार्थकामप्रदां
मोक्षज्ञानकरीं सदाशिवयुतां श्रीदक्षिणां कालिकाम् ।
तीर्थेऽस्मिन् समुपासते स्म बहवस्तन्त्रानुसारन्ततो
देवीशक्तिसमन्विता मुनिसमाः सिद्धा बभूवुर्द्विजाः ॥७६॥

श्रीवैद्यनाथशिवसन्निकटे स्थितान्तां
ब्रह्मादिदेवमुनिपूजितपादपद्माम् ।
श्रीकालिकां शुभकरीं समुपासते ये
तेऽद्यापि सिद्धिमतुलां समवाप्नुवन्ति ॥७७॥

हरि-विरिञ्चि-शिवैरभिराजिता
विबुधवृन्दकराम्बुजसंश्रिता ।
निखिलसिद्धमुनीन्द्रसुसेविता
विजयते सततं मम कालिका ॥७८॥

श्रीकालीमन्दिरतः पूर्वस्यां मन्दिरे माता "अन्नपूर्णा" तत्पूर्वे पश्चिमाभिमुखमन्दिरस्थौ श्रीलक्ष्मीनारायणौ, तद्याम्ये पश्चिमाभिमुखमन्दिरस्थः श्रीनीलकण्ठो भगवान् शनिग्रहश्च :-

तत्पूर्वे सुखदायिनी भगवती "माताऽन्नपूर्णा" स्थिता
तत्प्राच्यां रमया सहैव भगवान् भातीह "नारायणः" ।
तद्याम्ये शुभदः "शनि"र्विजयते भक्तैकपाता, तथा
गौरीशार्चनपूर्णसत्फलकरः "श्रीनीलकण्ठः शिवः" ॥७९॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

बाबामन्दिरपूर्वद्वारकपाटे श्रीगणेशस्तदुत्तरे वृषभमूर्त्तयः :—

पूर्वद्वारकपाटगोगणपतिर्गौरीशपुत्रः प्रियः
सुश्वेताकृतिराशुमङ्गलकरो यो विघ्नहर्त्ताऽर्चितः ।
ऐशाने-वृषमूर्त्तयो विलसिता बाह्ये शिवस्यालये
सन्ति द्वारगदेवताः प्रहरिणस्त्वेवं प्रियाः शूलिनः ॥८०॥

देवगणैर्वन्द्यमानः श्रीवैद्यनाथः :—

सोऽयं देवगणैर्वृतोऽत्र भगवान् कैलासनाथः स्वयं
गौरीषण्मुखसद्गणेशसहितो मोदान्वितः शङ्करः ।
सत्यास्तद्धृदये स्थितोऽमरगणैः संवन्द्यमानो मुहु-
र्भक्ताभीष्टफलप्रदो विजयते "श्रीवैद्यनाथः शिवः ॥८१॥

ब्रह्मणो मन्दिरसमीपे मध्यमा घण्टा, कालभैरवमन्दिर-सविधे बृहती घण्टा, प्राङ्गणे चक्रन्तुलसीस्थानमुत्तरस्याञ्चन्द्र-कूपान्तिकं सिंहद्वारम् :—

भक्तत्रासनिवारणाय महती घण्टा विभात्यद्भुता
तत्पूर्वेऽपि विलक्षणध्वनिकरी घण्टा प्रशस्ताऽपरा ।
चक्रं प्राङ्गणसंस्थितं च तुलसीस्थानं परं पावनं
सिंहद्वारमहो विराजतितरां सच्चन्द्रकूपान्तिके ॥८२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शिव-मन्दिरप्राङ्गणगमागमहेतुकद्वारत्रयम् :—

शम्भोः प्राङ्गणसद्गमागमकृते द्वारत्रयं वर्त्तते
सौम्यायान्दिशि पूर्वपश्चिमदिशोश्चैवं सुराणामिह ।
तद्गेहान्यभितः सुरक्षणकरी भित्तिर्दृढा तूच्छ्रिता
सीमोद्बोधविधायिनी जयति सा सर्वासु दिक्षु स्थिता ॥८३॥

चन्द्रकूपवर्णनम् :—

शम्भोर्मन्दिरप्राङ्गणेऽतिरुचिरः कूपो गभीरोच्चग-
स्तस्यैवामृतवारिणा भगवतो गौरीपतेः पूजनम् ।
कुर्वन्त्यत्र ततः स चन्द्रपदयुक्-कूपो जगत्यां श्रुतो
यत्रानीय सुधां शशाङ्कनिकटाच्चिक्षेप सद्रावणः ॥८४॥
उपर्युपरि चेष्टन्ते सलिलश्चन्द्रकूपतः ।
प्रभर्त्तुमिह भक्तास्तद् दृश्यं भाति विलक्षणम् ॥८५॥

शिवगङ्गावर्णनम् :—

दीर्घन्तच्चतुरस्त्रकं सुविमलं सद्वारियुक्तं सरः
प्राचीनं शिवपूर्वकं विलसितं गङ्गाख्यकं पावनम् ।
स्नानन्तत्र विधाय पूतहृदयाः श्रीवैद्यनाथं विभुं
सम्यक् पूजयितुं शिवस्य भवने भक्ताः समायान्ति ते ॥८६॥

मालाकाराणां पुष्प-माल्य-बिल्वदलानि :—

सद्बिल्वपत्राणि सपुष्पकाणि माल्यान्यपूर्वाणि प्रसारितानि ।
क्रय्याणि तत्रैव भवन्ति नित्यं मालाकृतां कृत्यमपूर्वमेतत् ॥८७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शिवस्य वैशिष्ट्यम् :—

श्रीकार्त्तिकेयगणनाथसुतद्वयाढ्य-
स्तुष्टाननाऽचलसुतापरिसेव्यमानः ।
प्रामोदमेत्य भगवाँच्छिवशूलपाणि-
र्गङ्गाधरो जयति सद्विधुशेखरोऽसौ ॥८८॥

उच्चैर्महादेव-हर-शब्दोच्चारणम् :—

कपाटकोद्घाटनहेतवेऽत्र केचिन्महादेवहरेति नाम ।
प्रोच्चैर्वदन्तः शिवपूजकास्तद्विभान्ति नित्यं शुभसन्ध्ययोस्ते ॥८९॥

बम्-बम्-महादेवोच्चारणम् :—

केचिन्महादेवहरेति शब्दं बम्बम्महादेव-वचो वदन्तः ।
प्रयान्ति तन्मन्दिरमाशुगत्या गौरीपतिं पूजयितुं सुभक्त्या ॥९०॥

प्रभाते सरदारपण्डाद्वारापूजनम्, ततोऽन्यजनैः पूजनम् :—

सूर्योदयात् प्राग् विविधोपचारैः पण्डावरिष्ठस्य सुपूजकोऽयम् ।
आदौ मृडानीपति-वैद्यनाथं सम्पूजयत्यत्र ततोऽन्यलोकाः ॥९१॥
श्रीपत्रगङ्गाजलपुष्पकाणि पूजोपचारान्विविधाँश्च भक्ताः ।
नीत्वा समर्चन्ति नगात्मजेशं "श्रीवैद्यनाथं" शुभलाभहेतुम् ॥९२॥

पूजक-ब्राह्मण-स्वरूप-वर्णनम् :—

भाले भस्मविलेपनन्त्रिदलितं रुद्राक्षमालाङ्गले
पृष्ठे शङ्करनामलेखललितं धृत्वा दुकूलं परम् ।
मन्त्रानागमगाँस्तथा निगमगान् व्याचक्षमाणा द्विजा
राजन्ते शिवसन्निधाविह ततः श्रद्धास्पदं दृश्यकम् ॥९३॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लोक-सम्मर्द-व्यस्तत्वेऽपि पूजार्थं जनोत्सुकता :—

"बम्बम्बम्पद"मुच्चकैः प्रतिपलं सद्घोषयन्तो मुदा
शम्भोर्भक्तिपरायणाः शिवगृहे ते लोकसम्मर्दतः ।
देहैर्देहनिघर्षणानि दधते व्यग्रा भवन्तोऽप्यतः
पूजां कर्त्तुमिहोत्सुका हि मनुजास्तद्दृश्यमत्यद्भुतम् ॥६४॥

वारंवारं श्रीवैद्यनाथस्पर्शनाय लोकयत्न :—

पूजाविधावाकुलिताः सुभक्ताः श्रीपार्वतीशं "शिववैद्यनाथम्" ।
भृशं स्पृशन्तोऽपि न तोषजुष्टा अहो पुनः स्प्रष्टुममुं यतन्ते ॥६५॥

गृहीतपूजोपसम्भारभक्ता :—

आदाय पुष्पादिपरागगन्धान् व्याप्ताः स्वनीडे मधुमक्षिकास्ताः ।
यथा तथा चन्दनपुष्पहस्ताः शिवालयं व्याप्य विभान्ति भक्ताः ॥६६॥

"नमः शिवाय" मन्त्रजपान्मनोरथसाफल्यम् :—

सम्पूज्य सत्पर्वतराजकन्यापतिं महेशं प्रसमीक्ष्य धन्याः ।
लब्धाभिलाषाश्च भवन्ति तेऽत्र नमः शिवायेति मुहुर्जपन्तः ॥६७॥

जपरताः शैवाः :—

धृतत्त्रिपुण्ड्राः सितभस्मना ये रुद्राक्षमालां दधतश्च विप्राः ।
जपे रताः श्रीशिवमन्त्रविज्ञा राजन्ति ते शङ्करभक्तिनिष्ठाः ॥६८॥

उत्फुल्लपद्मान्तरगा मधुव्रताः परागतृप्ताः प्रथयन्ति गुञ्जनम् ।
यथा तथोत्फुल्लसुपङ्कजोपमे तन्मन्दिरे ते ध्वनयन्ति मन्त्रकम् ॥६९॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राजानोऽधिकारिणो ज्ञानिनश्च पूजकाः :—

राजानोऽप्यधिकारिणो बहुविधास्ते पण्डिता दूरत-
स्तीर्थेऽस्मिन् समुपेत्य तुष्टमनसः पूजोपचारैर्वरैः ।
नित्यं शङ्करमाशुकामफलदं श्रीवैद्यनाथं विभुं
भव्यं भक्ति-भृतो भजन्ति भवसद्भूत्यै भवानीभृतम् ॥१००॥

दण्डप्रणामवर्णनम् :—

दण्डप्रणामविधिना बहवोऽत्र भक्त्या
मार्गं सुदुस्सहतरं विशदं व्रजन्तः ।
सम्प्राप्य शम्भुनिकटं कृतकृत्यमुच्चं
स्वं मन्वते गिरिसुतापति-दर्शनेन ॥१०१॥

भक्ता आत्मनिकेतनात् सुरनदीतीर्थादितो भावुकाः
साष्टाङ्गप्रणिपातदुस्सहतपो मार्गे कठोरे मुहुः ।
कुर्वन्तो हि सुपुण्यपर्वदिवसेऽत्रायान्त्यनेके, तथा
स्नात्वा श्रीशिवगाङ्गवारिणि हरन्तं पूजयन्त्यामुदा ॥१०२॥

ढोलवादकानां दृश्यम् :—

"बाबामन्दिर"-प्राङ्गणे शुभविधिं पूजान्तु सम्पाद्य ये
भक्ता यान्ति तदाऽत्रताननुचरन् गायञ्छिवाशीर्वचः ।
वाद्यश्चापि निनादयन् "हरिजनो" वित्तं मुहुर्याचते
श्रीशम्भोः कृपया पणान् स लभते तद्दृश्यमामोदकृत् ॥१०३॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

'धरना' दायकानां वृत्तम् :—

स्वीयश्रेष्ठफलानि लब्धुमिह सन्त्यज्यान्नपानादिकं
श्रीमच्छङ्करमन्दिरं हि परितो भूमौ शयाना नराः ।
ध्यायन्तः समुपासते शिवममुं तस्मात् स्वदुर्भाग्यकं
दूरीकृत्य सुखानि यन्ति तरसा त्वेतज्जनैर्दृश्यते ॥१०४॥

प्रदोषे पूजासामग्रीसहितद्वारनिकटे समवेतभक्तानां दृश्यम् :—

शम्भोर्मन्दिरसौम्यदिग्गतशुभद्वारस्थिता ब्राह्मणाः
पूजार्थं वरपूतवस्तुसहिताभक्ताः प्रदोषेऽन्वहम् ।
द्रागुद्घाटयितुं कपाटममलं श्रीवैद्यनाथस्य तं
"बम्बम्" शङ्करमुच्चरन्त इति ते भान्त्यात्मतृप्त्यै मुहुः ॥१०५॥

श्रीवैद्यनाथशिवसमीपे प्रसारितपूजोपचार-वेदध्वनि-दृश्यम् :—

रात्रौ शिवार्चावसरे त्वनेके पूजोपचारान् विविधान् प्रसार्य ।
पठन्ति विप्रा वरवेदमन्त्रान् दृश्यन्तदत्र प्रतिभात्यपूर्वम् ॥१०६॥

शिवलिङ्गे सुगन्धितैललेपनं शुद्धजलस्नानञ्च :—

भृङ्गारकाले प्रथमं सुगन्धितैलं भवानीपतिदेवमुग्रम् ।
विलेपयित्वा परिसेवमानः शुद्धैर्जलैः स्नापयतीह विप्रः ॥१०७॥

वस्त्रखण्डैः शिवलिङ्गप्रोक्षणम्, चन्दनाक्षतपुष्पसमर्पणम् :—

ततोऽस्य शम्भोर्वरवस्त्रखण्डैः संप्रोक्षणं साधु विधाय शीघ्रम् ।
सुचन्दनान्यक्षतपुष्पकाणि समर्पयत्यत्र शिवेऽर्चकोऽसौ ॥१०८॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

घामचन्दनार्पणं तन्माहात्म्यञ्च :—

घृष्टैः सुचन्दनचयैरिह निर्मितन्तैः
श्रीघामचन्दनसमाख्यकगोलकन्तत् ।
भृङ्गारहेतुकमहो भवति प्रकामं
माहात्म्यमस्य शिवचन्दनकस्य तेन ॥१०९॥

इह शिवार्चनहेतुकमुत्तमं भवति घामकचन्दननामकम् ।
तदतिदुःखनिवृत्तिकरं परं दधति तेन जना निजभालके ॥११०॥

बहुबिल्वपत्रपुष्पमाल्यैः भृङ्गाररूपस्योच्चकरणम् :—

ततः परं बिल्वदलानि दत्त्वा माल्यैः सुपत्राणि च वेष्टयित्वा ।
उच्चं करोतीह मुहुर्मुहुस्तच्छृङ्गाररूपं सुषमास्पदं सः ॥१११॥

तदुपरि पुष्पादिनिर्मितकिरीटकम् (मौरस्थापनम्) :—

कलात्मकैस्तत्र प्रलम्बमाल्यैः शस्तैः प्रसूनै रचितन्तु दिव्यम् ।
किरीटकं मौरपदेन वाच्यं भृङ्गाररूपे निदधाति विप्रः ॥११२॥

भृङ्गारोपरि वस्त्रम :—

यदा कदा श्रीगिरिजापतेस्तच्छृङ्गाररूपात्मकनिर्मितेन ।
वस्त्रेण सौम्येन शिवस्य तं सच्छृङ्गारमाच्छादयतीति दिव्यम् ॥११३॥

धूपदीपनैवेद्यादिभिः पूजनम् :—

ततो धूपदीपान् परं वस्तु मिष्टं सुनैवेद्यमुग्राय पेयं जलञ्च ।
सताम्बूलपूगीफलम्प्रार्पयित्वा विधत्तेऽत्र कर्पूरमारात्तिकं सः ॥११४॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कर्परारात्तिकदृश्यम् :—

अतःपरं भक्तजना महेशमारात्तिकं द्राक् परिदर्शयन्ति ।
स्तुवन्ति सम्यक् प्रणमन्ति भक्त्या चैतानि दृश्यानि सुपुण्यदानि ॥११५॥

आरात्तिकान्ते करतलध्वनिः :—

आरात्तिके विधियुते सति पूजनान्ते
श्रीशङ्करस्य सविधे बहवः सुभक्त्या ।
कुर्वन्ति सत्करतलैर्ध्वनिमत्र पूर्णं
तद्दृश्यमद्भुतमहो भवति प्रकामम् ॥११६॥

जपः पुष्पाञ्जलिश्च :—

पूजावसाने प्रणवान्विताय नमः शिवायेति मनुञ्जपित्वा ।
जपन्निवेद्याशुफलप्रदाय पुष्पाञ्जलिश्चार्चक एष दत्ते ॥११७॥

शृङ्गारशोभावर्णनम् :—

प्रदोषे श्रीशम्भोः प्रतिदिनमिहार्चा विधियुता
सुपुष्पैः श्रीपत्रैर्मलयगिरिसच्चन्दनचयैः ।
भवत्येवं श्लाघ्या भवभयहरा भक्तिभरिता
स्तुता शृङ्गाराख्या जगति सुषमा राजतितराम् ॥११८॥

रात्रौ शृङ्गारकाले श्रुतिमतविधिना वैद्यनाथं महेशं
भक्त्या सम्पूज्य विप्राः प्रचुरसुमहिमानं सुरैः स्तूयमानम् ।
गौरं कर्पूरभासं हिमगिरितनयाशोभितं विश्ववन्द्यं
सम्यक् प्रारात्तिकन्ते प्रतिदिनमिह सद्दर्शयन्तो विभान्ति ॥११९॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मयूरपिच्छव्यजनवातार्पणम् :—

आरात्तिकान्ते शिखिपुच्छपुञ्जैर्विनिर्मितेन व्यजनेन लोकाः ।
प्रसादयन्त्यत्र सुमेनकाया जामातरं शङ्करमाशुतोषम् ॥१२०॥

अखण्डदीपः :—

यः पापरूपं तम आशु निघ्नन् तच्छाम्भवन्तेज उदञ्चयन् द्राक् ।
अखण्डदीपः शिवसन्निधाने चिरात् प्रदीप्तोऽस्ति प्रकाशमानः ॥१२१॥

प्रदोषे शङ्करगुणगायकादयः :—

गायन्ति शङ्करगुणान् बहुधा स्तुवन्ति
प्रीत्या नमन्ति परितो हि शिवं प्रदोषे ।
शृङ्गारदर्शनमवाप्य नराः प्रहृष्टा
नित्यं भवन्ति गिरिजापतिसन्निधाने ॥१२२॥

वेदपाठकानां दृश्यम् :—

गौरीमठे शम्भुमठे त्वनेके भक्त्योपविश्यात्र प्रदोषकाले ।
सुवेदमन्त्रान् प्रपठन्ति नित्यं स्वरेण विप्राः श्रुतिसत्प्रियन्तत् ॥१२३॥

निशादौ शिवप्राङ्गणे गीतभजनादिदृश्यम् :—

नित्यं निशादिसमये हरमन्दिरस्य
तत्प्राङ्गणे बहुविधां शिवभक्तिगाथाम् ।
गायन्ति भक्तिवचसा श्रुतिसत्प्रियान्ता-
मुल्लासिता हि पुरुषा महिलास्तथाऽत्र ॥१२४॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शृङ्गारदर्शनमेलाहश्यम् :—

शृङ्गारदर्शनकृते परया सुभक्त्या
श्रीशङ्करस्य सविधे मनुजा अनेके ।
आयान्ति नित्यमुत तेन शिवालये सत्
सम्मर्दनं गुरुतरं भवतीह सद्यः ॥ १२५ ॥

रहस्ये दुग्धादिविशेषनैवेद्यम् :—

शिवान्तिकस्थान् किल लोकसङ्घान् रात्रौ बहिष्कृत्य रहस्य एव ।
विशेषदुग्धादिकमर्चकोऽसौ समर्पयत्यत्र शिवाय तस्मै ॥ १२६ ॥

प्रात्यहिकमन्दिरकपाटसम्पुटीकरणसमयः :—

सार्द्धद्विवादनमिते हि दिने च रात्रौ
प्रायोऽङ्कवादनमिते समयेऽत्र शैवाः ।
लोकाँस्तु शम्भुभवनादपसार्य नित्यं
सम्मीलयन्ति शिवमन्दिरगान् कपाटान् ॥ १२७ ॥

पण्डाजनानां स्वगृहगमनम् :—

शम्भोः कपाटसुपुटीकरणं विधाय
श्रीवैद्यनाथशिवपूजनतोऽर्थसिद्धाः ।
पण्डाजना हि गिरिजेशप्रसादहस्ताः
स्वं स्वं गृहम् शिवहृदस्तरसा प्रयान्ति ॥ १२८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नित्यमागन्तुकानां पूजा :—

नित्यं स्वीयमनोरथान् फलयितुं पूजोपसम्भारिणः
श्रीमच्छङ्करसन्निधौ कतिजना आगत्य दूरादिह ।
देवं कामदलिङ्गमाशुफलदं गौरीसमेतं शिव-
न्तत्पार्श्वस्थितदेवताश्च विधिना सम्पूज्य तुष्यन्ति सत् ॥ १२९ ॥

वसन्तपञ्चमीपूजा :—

माघे श्रीयुतपञ्चमीशुभतिथौ वैदेहसद्ब्राह्मणा
अन्ये चापि समेत्य कामदशिवं गङ्गाजलाद्यैस्तदा ।
सम्पूज्यात्मसुतृप्तिमाशु दधते तीर्थे हि पुण्याकरे
लोकानां निचयोऽधिकस्तत इहामोदावहो दृश्यते ॥ १३० ॥

गङ्गाजलैर्विविधपुष्पसुबिल्वपत्रैः
सद्वस्तुभिः शिवहृदो मनुजाः समन्तात् ।
अर्चन्ति कामफलमाप्तुमिहाति-भक्त्या
श्रीकामदं पशुपतिं भववैद्यनाथम् ॥ १३१ ॥

कामद (कामर) दृश्यम् :—

वैदेहा अधिकास्तथाऽन्यपुरुषास्तत् "कामराख्यं" परं
भारं गाङ्गजलस्य भक्तिभरिताः स्कन्धैर्वहन्तो मुदा ।
"बोलेब्बम्"पदमुच्चरन्ति सततं तेऽनेकतीर्थागताः
केचित्तेषु "नमः शिवाय" च मनुं जल्पन्त आयान्ति सत् ॥१३२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्कन्धे तत्कामराख्यं शुचिमयसलिलैरन्वितं प्रोद्वहन्तो
नानातीर्थेभ्य एत्य प्रमुदितहृदयाः पुण्यकाले विशिष्टे ।
भक्ताः श्रीवैद्यनाथं सुखशुभफलदं शङ्करम्पूजयन्तो
भान्त्यत्रानेन दृश्यन्त्वतिशयरुचिरं जायते पुण्यहेतोः ॥१३३॥

शिवरात्रिपूजा :—

प्रत्यब्दं शिवरात्रिपर्वदिवसे दूरादनेकस्थलात्
आगच्छन्ति हि लक्षतोऽधिकनरा गङ्गादितीर्थात्तथा ।
गाङ्गं वारि समुद्वहन्त इह ते पूजोपसम्भारिणो
भक्त्या देवपतिं यजन्ति परितः श्रीवैद्यनाथं विभुम् ॥ १३४ ॥

महाशिवरात्र्युत्सवे चातुर्यामपूजनदृश्यम् :—

मासे फाल्गुनिके महाशिवयुते रात्र्युत्सवे शोभने
"बाबामन्दिरके" तथान्यविलसद्देवालयेषूत्तमम् ।
चातुर्यामसुपूजनं गिरिसुताजानेः प्रकुर्वन्ति ते
शैवास्तेन तदत्र दृश्यकमहो भात्यद्भुतं पावनम् ॥ १३५ ॥

महाशिवरात्रिमेलादृश्यम् :—

द्रष्टुं शङ्करसद्विवाहमिह वै मासे तपस्ये शुभे
कृष्णे भूततिथौ स्त्रियो बहुजना आबालवृद्धा अहो ।
आगत्याशुफलप्रदं शिवमिमं सम्पूजयन्त्यामुदा
तस्माद्द्भुतदृश्यमापतति सा "मेला" भवस्यालये ॥१३६॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शिवविवाहदिने मन्दिरस्तूपे प्रचुरमौरदृश्यम्, रक्तडोरक-ग्रन्थिबन्धदृश्यञ्च :—

शम्भोर्विवाहदिवसे शिवमन्दिरस्य
शीर्षे त्रिशूलनिकटे मुकुटान् सुभव्यान् ।
सद्ग्रन्थिबन्धनकृतेऽरुणवस्त्रखण्डान्
प्रीत्याऽर्पयन्ति च जनाः स्वमनोरथाप्त्यै ॥१३७॥

श्रावणमासपूजा :—

प्रत्यब्दं गिरिजापतेर्धवलितन्तत्तीर्थमागत्य ते
मासे श्रावणिके द्विजाः सुविधिना श्रीवैद्यनाथं विभुम् ।
प्रीत्या सद्यजमानभव्यनिचयप्राप्त्यै समर्चन्ति च
मासं व्याप्य शिवालये प्रमुदिताः कुर्वन्ति पाठादिकम् ॥१३८॥

श्रीवैद्यनाथं गिरिजादिसेव्यं समर्चितुं श्रावणमासि लोकाः ।
आयान्ति दूराद्बहुभक्तिभावैर्नित्यं सुतीर्थे शिवसन्निधाने ॥१३९॥

अद्वितीयसुन्दरबिल्वपत्रप्रदर्शनम् :—

शैवास्तीर्थनिवासिनो द्विजवराः श्रेष्ठात्त्रिकूटाचला-
दन्यस्माद्विपिनादपूर्वसुषमापूर्णानि चानीय ते ।
श्रीपत्राणि, विधोर्दिने नभसि सद्गौरीपतेः प्राङ्गणे
श्लाघ्यत्वाय प्रदर्शयन्ति मुदितास्तद्दृश्यमत्यद्भुतम् ॥१४०॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्रत्यशुष्कचूर्णगलितबिल्वपत्राणामपि माहात्म्यम् :—

श्रीशङ्करस्य सविधे सुषुमान्वितस्य
श्रीपत्रकस्य नहि केवलमस्ति पुण्यम् ।
माहात्म्यमत्र गलितस्य च चूर्णितस्य
शुष्कस्य बिल्वदलकस्य वदन्ति सन्तः ॥१४१॥

प्रचुरबिल्वदलैर्गिरिजापतिं भवभयापहरं वरदायकम् ।
इह यजन्ति जनास्तत एव ते समुपयान्ति परां श्रियमद्भुताम् ॥१४२॥

रुद्राभिषेकदृश्यम् :—

नभो मासे विप्राः श्रुतिगतविधानेन वरदं
शिवं गौरीनाथं प्रियतमसुपञ्चामृतमयैः ।
तथाऽन्यैः सद्द्रव्यैरथ जलचयैर्भक्तिभरिताः
समक्षेमप्राप्त्यै विशदमभिषिञ्चन्ति परितः ॥१४३॥

देवेशस्य महेश्वरस्य भगवच्छ्रीवैद्यनाथस्य ते
वेदोक्तेन विधानतो द्विजवरा मन्त्रार्थपारङ्गताः ।
लोकानां शुभहेतवे जलचयैः पञ्चामृतैश्चोत्तमैः
कुर्वन्तीह विलक्षणं प्रतिदिनं भक्त्याऽभिषेकम्परम् ॥१४४॥

प्रतिदिनं सकलेष्टकरं शिवं सुविधिना स्नपयन्ति हि वैदिकाः ।
तदिह दृश्यमतीव विलक्षणं भवति पुण्यकरं कुशलप्रदम् ॥१४५॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अहमहमिकाभावेन पजाऽऽसक्तजनदृश्यम् :—

हस्ताभ्यामूर्ध्वगाभ्यां विधृतशुचिमयार्चोपचारैः समन्ताद्
भूतेशं प्राचितुन्द्रागहमहमिकयोत्साहभाजो जनास्ते ।
चेष्टन्ते तेन शम्भोर्गृहमिह सुजनैर्व्याप्तं भक्तियुक्तै-
स्तद्दृश्यं शोभनीयं भवति हि बहुलं रुद्रपूजाप्रसक्तम् ॥१४६॥

यावन्ति दृश्यानि लसन्ति "बाबाश्रीवैद्यनाथस्य" निकेतनेऽत्र ।
भक्तप्रमोदानि शुभानि तानि विभान्त्यपूर्वाणि विलक्षणानि ॥१४७॥

पुत्रसुखाप्तिहेतुकानुष्ठानदृश्यम् :—

विशेषतः पुत्रसुखाप्तिहेतोः कुर्वन्त्यनुष्ठानविधिं विधानैः ।
ततो निजेष्टं फलमाप्नुवन्ति भक्ता इदं दृश्यमपूर्वमत्र ॥१४८॥

श्रीवैद्यनाथशिवपूजनादनेकशुभफलाप्तिः :—

रोगात्तु घोराद्विनिवृत्तिहेतोरायुष्यवृद्ध्यै च सुजीविकाप्त्यै
युद्धे जयायात्र यजन्ति लोकाः श्रीवैद्यनाथं हि तथाऽन्यदेवान् ॥१४९

श्रीवैद्यनाथं शिवमर्चयित्वा दीर्घायुरारोग्यमतीव-सौख्यम् ।
धनानि पुत्रान् विजयाँश्च भक्ताः सम्प्राप्नुवन्तीह शिवप्रसादात् ॥१५०॥

भाद्रपदानन्तचतुर्दशीपूजा :—

भाद्रेऽनन्तचतुर्दशीसुदिवसे स्थानादनेकादहो !
स्कन्धेषु प्रचुरं निधाय सलिलं गङ्गादितीर्थोद्धृतम् ।
आनीयात्र शिवाय भक्तिभरिता लोकाः समर्चन्ति ते
श्रीगौर्यादिकदेवताविलसितन्तं वैद्यनाथं शिवम् ॥१५१॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीदुर्गापूजा :—

श्रीदुर्गार्चनमाश्विनेऽत्र विधिना प्रत्यब्दमत्यद्भुतं
नानातन्त्रपुराणवेदविहितं सौम्योपचारादिभिः ।
पण्डाधीशनिकेतनेऽन्यपुरुषागारेषु भक्त्यन्वितं
गौरीशस्य पुरे भवत्यतितरान्तद्दृश्यकं वृद्धिदम् ॥१५२॥

यदा यदा देवप्रपूजनाय वेलाः समायान्ति महत्त्वपूर्णाः ।
तथा तदैते सुविधानतोऽत्र देवान् यजन्तो हि विभान्ति विप्राः ॥१५३॥

प्रत्येकपर्वपूजा :—

प्रत्येकस्मिन् पर्व-काले समन्तादागत्यास्मिँस्तीर्थके लोकसङ्घाः ।
अर्चन्तोऽमुं श्रीमृडानीपतिन्ते लब्धार्था द्राक् सम्भवन्त्येव धन्याः ॥१५४॥

अन्यतीर्थदेवापेक्षयाऽत्रत्यशिवस्य वैशिष्ट्यम् :—

अन्ये तीर्थनिवासिनोऽमरगणाः कुर्वन्ति ते सर्वदा
पुण्यालीसुभृतां महामतिमतां श्रीसौख्यसत्सम्पदः ।
अत्रत्ये तु विशिष्टताऽर्चनवशाच्छ्रीशङ्करे दृश्यते
यद्दुर्भाग्यजुषामघावलियुजामप्युन्नतास्ताः श्रियः ॥१५५॥

श्रीवैद्यनाथमाहात्म्यम् :—

भक्तानामभिवाञ्छितार्थफलदः प्रत्यक्षसिद्धिप्रदः
श्रीगौरीहृदयाब्जषट्पद इहासावात्मतृप्त्याकरः ।
श्रीहेरम्बसुकार्त्तिकेयमुदितोऽपर्णालसत्त्र्यम्बको
लोकानामभिरक्षको विजयते श्रीवैद्यनाथः प्रभुः ॥ १५६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"श्रीवैद्यनाथशिवप्रशस्तिः"

श्रीवैद्यनाथशिवलिङ्गसमर्चनेन
तत्-स्पर्शनेन किल दर्शनतोऽपि तस्य।
यत् पुण्यमुक्तमिह तच्छिवमन्दिरस्य
चैतत्-त्रिशूलपरिदर्शनतोऽस्ति पुण्यम् ॥ १५७ ॥

श्रीहार्दपीठस्थशिवात्मकन्तल्लिङ्गं परं कामदमस्ति दिव्यम्।
एकस्य तस्यैव सुपूजनेन सत्कोटिलिङ्गार्चनपुण्यमुक्तम् ॥ १५८ ॥

श्रीमच्चतुर्वर्गफलप्रदं ये श्रीवैद्यनाथं गिरिजादिसेव्यम्।
प्रदोषकाले विविधोपचारैर्यजन्ति ते देवगणान् यजन्ति ॥ १५९ ॥

भयापहं भक्तजनैकभाव्यं भवाब्धिपोतं भवमुक्तिदं ये।
भास्वत्प्रभाभूषितभव्यरूपं भजन्ति ते भव्यभृतो भवन्ति ॥ १६० ॥

श्रीपार्वत्या माहात्म्यम् :—

वरदशङ्करसम्मुखसंस्थिता नगसुता शुभदा जगदम्बिका।
अथ शिवा महिषासुरमर्दिनी विजयतेऽत्र मनोरथपूर्त्तिदा ॥ १६१ ॥

दुर्गे दुःखहरे स्मृता भवभयाद् भक्तान् सुरक्षत्यलं
सर्वां सम्पदमातनोतिरुचिरां या श्रीः समाराधिता।
सैषाऽनन्यधिया स्तुता शुभमतिन्दत्ते, तु सम्पूजिता
चातुर्वर्ग्यफलप्रदाऽस्त्यपि च सा श्रीपार्वती शङ्करी ॥१६२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"श्रीवैद्यनाथशिवप्रशस्तिः"

या गौरी पार्वती सा त्रिपुरपदयुता-सुन्दरी सैव मान्या
शोभाढ्या लोकमाता गिरिपतितनया पूजिता क्षेमदाऽस्ते ।
श्रीदुर्गा सिद्धसेव्या महिषदनुजहा देवरक्षापरा या
सा स्तव्या भक्तिगम्या जगति विजयते शङ्करी शङ्कराग्रे ॥१६३॥

अथात्रत्यशिवशासनविभागास्तत्र श्रीजगज्जननीमाहात्म्यम् :—

लोकोत्पत्तिकृते विराजति चिरादाद्यो विभागोऽत्र यः
सम्यक् तस्य सुचालनाय महिता निर्धारिता शोभना ।
पूज्यैर्देवगणैर्वृता भगवती तीर्थे हि पुण्याकरे
सैषा श्रीजननी विभाति जगतां लोकैः समाराधिता ॥ १६४ ॥

श्रीगणेशमाहात्म्यम् :—

द्वितीयो विभागोऽस्य शम्भोः समीपे महाविघ्नहारी सदा सिद्धिकारी ।
तदध्यक्षतामाश्रयत्येष गौरी-महादेवसूनुर्गणेशोऽत्र देवः ॥ १६५ ॥

श्रीब्रह्मणो माहात्म्यम् :—

तृतीयो विभागोऽस्य संसारसृष्ट्यै
तथा भाग्यवृद्ध्यै सुनिर्धारितोऽस्ति ।
तदध्यक्ष आस्ते स्वयम्भूः स्वयं हि
समुत्पादयन् सर्वविश्वानि शश्वत् ॥ १६६ ॥

घण्टामाहात्म्यम् :—

वाद्यं पूजनहेतवे निगदितं कर्णप्रियं पावनं
घण्टा सर्वसुवाद्यरूपमयिता शास्त्रानुसारं यतः ।
तस्मादत्र शिवान्तिकेऽर्चनकृते संस्थापिता सत्तमा
भक्तत्रासनिवृत्तये च महती घण्टा विभात्यद्भुता ॥ १६७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्राङ्गणे घण्टाद्वयम्, शिवमन्दिरान्तःकोणेषु च घण्टिकाः :—

घण्टाद्वयं वेदमिते विभागे विभ्राजते शङ्करप्राङ्गणेऽत्र ।
तन्मन्दिरे कोणगताश्चतस्रस्ता घण्टिका भान्त्यपि शम्भुभक्त्यै ॥१६८॥

श्रीगायत्रीमाहात्म्यम् :—

शम्भोः पञ्चमसद्विभाग इह यस्तत्स्वामिनी वन्दिता
गायत्री श्रुतिवर्णिता द्विजगणैर्याऽराधिता सर्वदा ।
सावित्री सुमता हि सा भगवती सन्ध्याऽपि या गीयते
ब्रह्मानन्दविकासिका विजयते सा पूर्णपुण्याकरा ॥ १६९ ॥

श्रीकालभैरवमाहात्म्यम् :—

षट्सम्मिते भूतपतेर्विभागे तीर्थस्थितानाञ्च समागतानाम् ।
गौरीशयोर्भक्तिपरायणानां सिद्धिप्रदः कालसुभैरवोऽस्ति ॥१७०॥

भक्तानां भयहृद्भवालयभरो भास्वत्प्रभाभासितो
भव्यो भावुकचेतसान्तु भविकैर्भक्तान् भरन् भ्राजितः ।
भूत्याभो भ्रमभेदको भगविभृद्भूभारभुग्भाग्यदो
भूमौ भाति स कालभैरव उमाजानेः प्रियो भुक्तिदः ॥१७१॥

श्रीअक्षयवटमाहात्म्यम् :—

शिवान्तिके सप्तमसद्विभागे पूजाफलस्याक्षयदोऽक्षयोऽयम् ।
वटोऽत्र देवोऽस्त्यथभित्तिसंस्थौ मल्लावमू स्तोऽन्यसुरेण साकम् ॥१७२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीतुलसीमाहात्म्यम् :—

तन्मन्दिरप्राङ्गणवायुशुद्ध्यै श्रीविष्णुपूजार्थमसौ प्रशस्तः ।
विराजते श्रीतुलसीसुवृक्षो लोकप्रियो ह्यष्टमसद्विभागे ॥१७३॥

श्रीहनुमतो माहात्म्यम् :—

शुभाष्टमेऽत्रैव लसद्विभागे देवैरनेकैः सह वन्द्यमानः ।
श्रीरामभक्तो हनुमान् बलिष्ठो विराजते भक्तसुरक्षकोऽसौ ॥१७४॥

श्रीकुबेरमाहात्म्यम् :—

इह हि शङ्करकोषसमृद्धये प्रविदिते नवमे सुविभागके ।
बहुधनप्रद एष धनाधिपो वत ! विराजति देवकुबेरकः ॥१७५॥

श्रीमनसादेवीमाहात्म्यम् :—

श्रीशम्भोर्दशमो विभाग इह यस्तत्स्वामिनी शोभना
पूज्या भक्तगणैः स्तुता हि प्रणुता कल्याणसम्पत्तिदा ।
माता मानसकष्टसङ्कहरणी सा मोदमातन्वती
"देवी श्रीमनसा" सदा विजयते मान्या मनोऽभीष्टदा ॥१७६॥

श्रीलक्ष्मीसरस्वतीमाहात्म्यम् :—

पूजार्थं शिवपत्तने निवसतामागन्तुकानान्तथा
विद्याबुद्धिविधायिनी प्रमहिता श्रीशारदा शोभते ।
तत्पार्श्वे समलोकपालनकरी लक्ष्मीः समग्राऽर्थदा
देव्यन्याऽपि विभागमाश्रितवती सैकादशं सत्तमम् ॥१७७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भगवतः श्रीसूर्य्यस्य माहात्म्यम् :—

श्रीवैद्यनाथसविधे रविसम्मिते सत्
प्रोच्चे विभाग इह भक्तजनाय तस्मै ।
आरोग्य-मायुरमितं प्रददाति नित्यं
श्रीसूर्य्य एष भगवान् विधिनाऽर्चितो द्राक् ॥१७८॥

यः सृष्टिस्थितिपालकः प्रलयकृद् धर्त्ता प्रशास्ता विभु-
र्लोकानामभिरक्षणाय गुरुकान् भारान् भरन् भासुरः ।
आत्मेत्यात्मविदां जगन्नियतिकृत् विश्वार्चिहृच्चोच्चगः
सोऽयं ब्रह्ममयः सदा विजयते श्रीसूर्य्यनारायणः ॥१७९॥

श्रीबगलादेवीमाहात्म्यम् :—

एवं त्रयोदशविभागगता रिपूणां
विध्वंसनी विजयदा बहुधाऽर्चिता या ।
सा भक्तपालनपरा सुगदाधरेयं
विभ्राजते भगवती बगलाऽत्र माता ॥१८०॥

अधिष्ठात्री शम्भोरिह हि विदिता देवमहिता
गदां शत्रोर्जिह्वां करकमलयुग्मेन सुतराम् ।
धरन्त्येषा नित्या जयसुमतिदा पीतवसना
समाराध्या भक्तैर्जयति "बगला" लोकहितदा ॥१८१॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

न्यायालये राजगृहे विवादे शत्रूद्गमे प्राणभयेऽतिकष्टे ।
सम्पूजिता श्रीबगलामुखीयं ददाति नित्यं विजयं समृद्धिम् ॥१८२॥

श्रीसीतारामलक्ष्मणमाहात्म्यम् :—

दीव्यच्चतुर्दशमितेऽत्र विभाग एतौ
श्रीरामलक्ष्मण–सुरौ जनकात्मजा सा ।
पापानि शङ्करसुभक्तिपरायणानां
प्राग्ध्वंसयन्ति सुरलोकसुखाप्तिहेतोः ॥१८३॥

श्रीगङ्गायमुनादिमाहात्म्यम् :—

दुर्ज्ञानपापविनिवारणतत्परास्ता
गङ्गाकलिन्दतनयादिकमूर्त्तयोऽत्र ।
राजन्ति पञ्चदशसम्मितसद्विभागे
श्रीशङ्करस्य शुभशासन-शुद्धिसिद्ध्यै ॥१८४॥

श्रीआनन्दभैरवमाहात्म्यम् :—

श्रीशम्भुषोडशविभागपतिस्तु भव्यो
भक्तार्त्तिनाशनपरोऽभयदो विशिष्टः ।
आनन्दभैरव-सुनामकदेव एष
विभ्राजते कुशलमोदसमृद्धिहेतुः ॥१८५॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीगौरीशङ्करमाहात्म्यम् :—

एवन्तु सप्तदशसम्मित-सद्विभागे
वागर्थबोधमिलितौ हि यथा तथैव ।
गौरीशिवौ सुरुचिरौ युगपत् स्थितौ तौ
वागर्थबोधनकरौ कुशलप्रदौ स्तः ॥१८६॥

श्रीनर्मदेश्वरमाहात्म्यम् :—

श्रीनर्मदेश्वर इहातिपवित्रताऽऽप्त्यै
ख्यातो विशिष्टफलकृद्विधिनाऽर्चितोऽसौ ।
अष्टादशाङ्कसुमिते हि विभाग एव
संशोभते सकलभक्तजनार्तिहृद्यः ॥१८७॥

श्री तारामाहात्म्यम्:—

एकोनविंशतिविभागगता शिवस्य
श्रीतारिणी विलसिता भुवि मोक्षदा या ।
शुभ्रातिशुभ्रमतिदा मुनिवन्दिता सा
"तारा" मता विजयते जगतां हिताय ॥१८८॥

श्रीमद्दक्षिणकालिकामाहात्म्यम् :—

वर्ण्या परा राजति शर्वशक्तिः सद्ब्रह्मरूपा निगमागमाद्यैः ।
याऽऽराध्यमानाऽखिलतत्त्वविज्ञैश्चाद्या शुभाढ्या ह्यपवर्गदा सा ॥१८९॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"श्रीवैद्यनाथशिवप्रशस्तिः"

"ब्रह्मन्द्रोपेन्द्रदेवैर्निखिलसुरवरैः" स्तूयमानां भवानीं
वैराग्यज्ञानकर्त्रीं कलिकलुषहरां भोगमोक्षैकदात्रीम् ।
खड्गं मुण्डं दधानामभयवरकरां रक्तजिह्वां हसन्त
वन्देऽहं विश्वहेतुं सकलमुनिगणैः सेवितां "कालिकान्ताम्" ॥१६०॥

समष्टिशक्तिर्निहिताऽस्ति यस्यां श्रीवैद्यनाथस्य सुराधिपस्य ।
दिव्यं महोऽत्रातनयत्यमोघं सा कालिका साधकसङ्घसाध्या ॥१६१॥

संसारकार्यकरणात्मकशक्तिरुग्रा
दिव्यप्रभावबलिता विदिता त्रिलोके ।
या विद्यते हि वरदक्षिणकालिकायाः
साऽस्याः कृपासुबलतः परया च शक्त्या ॥१६२॥

महाकालीमाता व्यरचयदिदं विश्वमखिलं
स्वशक्त्या, सा नित्या रमदयया पालयति तत् ।
सदा यस्या देवा अपि निजसुरक्षामधिगता
अहो सैवात्रास्मद् गुरुशिवसमक्षं विजयते ॥१६३॥

प्रभावन्तन्दिव्यं निखिलगुणजुष्टं धवलितं
परं यस्याः साक्षाद्विधिहरिहरा नो विदुरहो ।
इहत्या सैवेयं शिवहृदयगाऽम्बा प्रमहिता
दयाऽऽढ्या "श्रीकाली" जयति सततं भक्तसुखदा ॥१६४॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जने यस्मिन् प्रीता त्वमसि भगवत्यम्ब-महिते !
स पत्नीपुत्राद्यैः प्रचुरधनकीर्त्तिद्युतिवृतः ।
तथा त्वत्पादाब्जे भवभयसमुद्धारणपरे
दृढा भक्तिर्भव्या भवति करुणापूर्णहृदये ! ॥१६५॥

सुपूर्णां सर्वज्ञां सकलभुवनोद्धारणपरां
परामाद्यामम्बां जगदुदयरक्षालयकराम् ।
सदा चिन्त्यां सिद्धैः सुरमुनिनमस्यां सुमतिदां
श्रयेऽहं "श्रीकाली"मभयवरदान्तान्त्रिनयनाम् ॥१६६॥

जगन्मातस्त्वन्तम्महिषमसुरन्दारुणतरं
निशुम्भादीन् हत्वा सुरमुनिगणान् रक्षितवती ।
परब्रह्मानन्दा त्वमसि सकलैश्वर्यनिलया
प्रसन्ना त्वं भूया अभयवरदा रक्तरसना ॥१६७॥

श्री-अन्नपूर्णामाहात्म्यम् :—

तत्रैव विंशतिविभागगताऽति-मान्या
सम्पूजिता सकलभक्तजनेभ्य एषा ।
धान्यं धनं सुविपुलं प्रददाति नित्यं
श्रीशम्भुशासनविकासपरा"ऽन्नपूर्णा" ॥ १६८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीचन्द्रकूपमाहात्म्यम् :—

अत्रैकविंशतिविभागधरोऽस्ति दृश्यः
श्रीचन्द्रकूप इति नामक एष भव्यः ।
यस्यातिनिर्मलजलैः शिवपूर्वकाँस्तान्
देवान् यजन्ति विधिना भवभक्तसङ्घाः ॥ १९९ ॥

श्रीलक्ष्मीनारायणमाहात्म्यम् :—

श्रीलक्ष्म्या सहितो जगत्पतिरसौ नारायणोऽत्रार्चित-
स्तद्द्वाविंशतिसद्विभागसुपतिः शम्भोः प्रियः पावनः ।
यो लोकद्वयसाधकोऽतिमहिमा भुक्तिप्रदो मुक्तिदः
सोऽयं राजति देवताभिरपराभिर्वन्द्यमानो हरिः ॥ २०० ॥

श्रीनीलकण्ठमाहात्म्यम् :—

तत्र त्रयोविंशतिसद्विभागे श्रीनीलकण्ठो वरदो विशिष्टः ।
लोकैकधाता निजभक्तपाता पूजार्थदाता तु विराजते सः ॥ २०१ ॥

श्रीशनिग्रहमाहात्म्यम् :—

तद्वेदविंशतिविभागपतिर्वरेण्यो
भक्तार्थसाधनपरो भगवान् शनिर्यः ।
प्राणप्रपोषक उताशु शुभप्रदः सः
सम्पूजितो विजयतेऽन्यसुदेवयुक्तः ॥ २०२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीवसहाख्यवृषभमाहात्म्यम् :—

श्रीशङ्करार्च्चनकृते समुपागतानां
विघ्नान् निहन्तुमिह शम्भुकपाटपार्श्वे ।
सत्पञ्चविंशतिविभागधराणि नित्यं
तिष्ठन्ति तत्पशुपतेः प्रियवाहनानि ॥ २०३ ॥

श्रीसुदर्शनचक्रमाहात्म्यम् :—

षड्विंशतिप्रमितसौम्यविभागगं सत्-
तत्प्राङ्गणे स्थितसुचक्रमदः प्रशस्तम् ।
कष्टं विनाशयति पूजनतो नराणा-
मेवं प्रदक्षिणवशेन निहन्ति पापम् ॥ २०४ ॥

अन्यदेवतामाहात्म्यम् :—

सत्सप्तविंशतिविभागधराः प्रपूज्याः
पार्श्वोपपार्श्वसुगताः शिवमन्दिरस्य ।
ता देवताः शिवपुरे वसतां जनानां
संरक्षकाः शुभकरा हि भवन्ति नित्यम् ॥ २०५ ॥

श्रीस्वर्णविम्बेश्वरशिववर्णनम् :—

श्रीस्वर्णविम्बेश्वरनामकोऽत्र
चिरप्रतिष्ठोऽन्य-शिवः स पूज्यः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विराजते शम्भुगृहात्प्रतीच्यां
मार्गात्तु याम्ये सकलेष्टकारी ॥ २०६ ॥

श्रीवैजूनाथशिववर्णनम् :—

शम्भोर्मन्दिरतो यदाऽत्र मनुजास्तद्धूमयानस्थलं
गच्छन्तीति तदा सुराज्यपथतो याम्ये चिरस्थं स्थलम् ।
दृश्यं यद्भवति प्रशस्तमठतो दीप्तं हि तत्रैव सद्
"वैजूनाथ"समाख्यको विजयते श्रीशङ्करोऽभीष्टदः ॥२०७॥

श्रीतपोवनवर्णनम् :—

श्रीवैद्यनाथाच्छुभवह्निकोणे सार्द्धद्वयक्रोशमिते वरेण्यम् ।
तपोवनं रम्यमिदं प्रशस्तं चकार प्राग्यत्र तपः स शम्भुः ॥२०८॥
तपोवनस्योत्तमपर्वतेऽत्र चिरप्रसिद्धानि सुमन्दिराणि ।
देवा अनेके च वसन्ति तत्र शिवादयो भक्तकभव्यदास्ते ॥२०९॥

श्रीनन्दनपर्वतवर्णनम् :—

श्रीवैद्यनाथशिवमन्दिरतः प्रतीच्यां
भूक्रोशगोऽति-विदितो गिरिजापतेः सन् ।
क्रीडार्थमेव शुभनन्दन-पर्वतोऽयं
सन्दर्शनीय इह भाति "शिवेन" जुष्टः ॥२१०॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"श्रीहरलाजोड़ी"-वर्णनम् :—

तदुत्तरस्यान्दिशि क्रोशयुग्मे हरेर्हरस्यात्र सुमेलनं प्राक् ।
बभूव, तेनेदमुदञ्चितं सत्तीर्थं परं मन्दिरकुण्डयुक्तम् ॥२११॥
लोके "हरलाजोड़ी"-नाम्ना ख्यातं विशिष्टं सत् ।
तीर्थं शाङ्करमेतद्राजति रम्यं सुदर्शनीयन्तत् ॥२१२॥

श्रीत्रिकूटाचलवर्णनम् :—

क्रोशे हि पञ्चकमिते शिववैद्यनाथात्
प्राच्यां प्रसिद्धमुनिभिः परिसेव्यमानः ।
ख्यातस्त्रिकूट इह दीर्घगिरिः पृथुश्च
यत्रोद्भवन्ति वरविल्वदलानि सम्यक् ॥२१३॥

पञ्चक्रोशपरिक्रमावर्णनम् :—

एतानि तीर्थानि चिरप्रसिद्धान्यालोकमायान्ति महेश्वरस्य ।
तथोपतीर्थानि कियन्ति सन्ति तत्पञ्चकक्रोशपरिक्रमायाम् ॥२१४॥
देवाधिष्ठित-सुन्दरैः सुविदितैर्द्राक्दर्शनीयैः स्थलै-
स्तीर्थैः पुण्यचयावहैर्बुधजनैः सद्ब्राह्मणैश्चान्विता ।
पञ्चक्रोशपरिक्रमाऽस्ति भगवच्छ्रीवैद्यनाथस्य या
पुण्यार्थं विशदं हि सा सुमतिभिः श्रद्धालुभिः पूर्य्यते ॥२१५॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीवासुकिनाथतीर्थवर्णनम् तन्माहात्म्यञ्च :—

प्रसङ्गतस्तीर्थवरस्य चर्चा प्रगृह्यते शङ्कर-प्रीतिहेतोः ।
दृश्यं हि तीर्थं परमस्ति दिव्यन्तद्वासुकेर्धाम शिवस्य वन्द्यम् ॥२१६॥

पूर्वस्यां गिरिजापतेः सुनगराद्वेदाचलासम्मिते
क्रोशे तीर्थमतीवपुण्यदमहो प्रख्यातकीर्त्यावृतम् ।
श्रीमद्वासुकिनाथधाम शुभदं भक्तप्रियं सुन्दरं
यत्रारोग्यसुखाप्तये कतिजना दूरात्समायान्ति वै ॥ २१७ ॥

वन्दे परं वासुकिनाथमीशं सत्कामनापूरकमर्च्यमुग्रम् ।
सदाऽऽशुतोषं निजभक्तपालं गौरीसमेतं शुभधामपुञ्जम् ॥ २१८ ॥

भक्तार्त्तिहारी सकलोपकारी दिव्यप्रतापोज्ज्वलितो जगत्याम् ।
श्रीशङ्करो "वासुकिनाथ"-नामा विराजतेऽभीष्टफलप्रदाता ॥ २१९ ॥

श्रीमानसौ वासुकिनाथशम्भुर्देवै रनेकैः परिसेव्यमानः ।
ददाति तुष्टो ह्यभिवाञ्छितार्थं भक्ताय नित्यं स्तुत एष सर्वम् ॥२२०॥

श्रीजह्नु-मुनिस्थानस्थगङ्गाशिववर्णनम् :—

स्थानं जह्नु-मुनेः क्षितौ प्रविदितं यतोद्गता जाह्नवी
यस्या मध्यगपर्वतेऽतिमहिमा श्रीशङ्करो राजते ।
तस्माद्दक्षिणगे वियद्युगमिते क्रोशेऽस्ति प्रायः स्थितं
तीर्थं भारतविश्रुतं सुमहितं "श्रीवैद्यनाथाख्यकम्" ॥ २२१ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

बाबाश्री"अजगैबीनाथः" :—

श्रीजाह्नवी यत्र विभाति तत्र "नाथोऽजगैबी" शिव एष आस्ते ।
तस्मात्तु तीर्थाज्जलमुद्वहन्तः श्रीवैद्यनाथाय प्रयान्ति भक्ताः ॥२२२॥

श्रीवैद्यनाथतीर्थस्था वर्णनीयाः पण्डाजनाः, तत्र वर्त्तमान-"सरदार"पण्डावर्णनम् :—

वयोवृद्धः श्रेष्ठः कविरिह पवित्रो द्विजवरः
सुमन्त्रे वेदे च कृतमतिरसौ साधुगुणभृत् ।
सदा ज्ञानी ध्यानी यजनविधिनिष्ठोऽतिमहिमा
"भवप्रीतानन्दो" महितचरणः सद्विजयते ॥ २२३ ॥

अनेके ग्रन्थास्ते विरचनमगुर्वङ्गवचसा
तथा लोक्यं गीतं विदितमिह यस्यास्ति विपुलम् ।
स मान्यः पण्डेशो गिरिपतिसुतेशार्चनरतो
"भवप्रीतानन्दो" जयति बुधवन्द्यः कवि-वरः ॥ २२४ ॥

अथान्यपण्डाजनवर्णनम् :—

श्रीवैद्यनाथमभितोऽर्चयितुं सुभक्त्या
रुद्राक्षभस्मलसिताः शुचिरूपभाजः ।
पूजोपचारसहिताः शुभतीर्थभक्ताः
"पण्डा"जना इह विभान्ति परं वरेण्याः ॥ २२५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जनानां सम्मर्दैर्विपुलभययुक्तान् हरगृहे
सुरक्षन्तो लोकान् सुखमिह च सौविध्यमुचितम् ।
प्रकुर्वन्तो नृणां पशुपतिसमर्चार्थमिह इमे
वितिष्ठन्ते पण्डाः शिवगतहृदः सद्द्विजवराः ॥२२६॥

अपेक्षया ह्यन्यसुतीर्थकस्य पण्डाजना अत्र चरित्रशीलाः ।
तन्त्रानुसारं निगमानुसारं साम्बं शिवन्ते प्रयजन्ति भक्त्या ॥२२७॥

यजमानहितार्थसिद्धये पण्डाविप्रजना न केवलम् ।
अपि शीलवशेन तेऽन्वहं शिवमर्चन्ति सुभक्तिभावतः ॥२२८॥

शिवतीर्थनिवासिनो द्विजाः शाक्ता एव भवन्ति तेऽधिकाः ।
इयमेव विचित्रताऽत्र यत् सत्याः सद्धृदये सदाशिवः ॥२२९॥

इह वेदपरायणा द्विजा दृश्यन्ते बहवश्च तान्त्रिकाः ।
सुरपूजनकर्मनैष्ठिका विद्वांसोऽपि चरित्रशालिनः ॥२३०॥

अत्रत्यविप्रेषु विशेषतेयं यद्वेदतन्त्राद्यनुसारमेते ।
विशिष्टकालेषु यजन्ति देवान् सौम्योपचारैर्विविधैः प्रशस्तैः ॥२३१॥

न केवलं संस्कृतविज्ञवर्य्याः पण्डाजना अत्र लसन्ति मान्याः ।
आङ्ग्लादि-शास्त्रेषु परायणाश्च वैज्ञानिकाः सत्कवयोऽप्यनेके ॥२३२॥

देशं स्वतन्त्रं परतन्त्रताऽऽर्त्तेः कर्तुं यतन्तेस्म द्विजा इहत्याः ।
प्रमाणमस्याद्य शिवप्रसादाद्विहारराज्यस्य हि मुख्यमन्त्री ॥२३३॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मल्ला हि शूराः सुसमाजसेवा-विद्याप्रतिष्ठानविवृद्धिदाश्च ।
सनातनं धर्ममुदञ्चयन्तो विप्रा ह्यनेके निवसन्ति तीर्थे ॥२३४॥

श्रीवैद्यनाथतीर्थे ब्रह्मीभूता महात्मनः :—

ब्रह्मध्यानपरायणो गुणगुरुर्मान्यो वदान्यो विभु-
र्दीक्षादानविधानलब्धसुयशा लोकैः परं पूजितः ।
शश्वद्भक्तजनार्तिदुःखहरणो लग्नस्तपस्वी महान्
"बालानन्द"-समाख्यकोऽतिमहिमा सद्ब्रह्मचारी ह्यभूद् ॥२३५॥

पण्डाविप्रवरिष्ठो "बम्बम्बावा" सुनामको मान्यः ।
उग्रप्रभः समासीत् तपस्विवर्यो दयालुश्च ॥२३६॥

शाब्दं शास्त्रमथागमं सविशदं तां योगविद्यान्तथा
वेदान्तादिकदर्शनानि परमं वेत्तिस्म तज्ज्यौतिपम् ।
आद्यां शक्तिमुपास्य यो हि सुमहान् "सिद्धः"स्तुतो ब्रह्मवित्
सोऽभूत्सद्बुधवन्द्य एप "जगदानन्दो" महात्मा गुरुः ॥२३७॥

विशिष्टस्तन्त्रज्ञो बहुविधसुमन्त्रार्थनिपुणः
क्रियासिद्धो भव्यो जपनियमनिष्ठो बहुयशाः ।
सदाऽम्बापादाब्जार्चनविधिनिमग्नोऽतिमहिमा
"प्रकाशानन्दा"ख्यो नृपतिवरवन्द्योऽत्र समभूत् ॥२३८॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्रान्येऽपि कतिविधमहात्मानो बभूवुः :—

पुरायुगे तीर्थवरे महान्तः शाक्ता हि शैवा उत वैष्णवाद्याः ।
सिद्धा महात्मान इहातिमान्या बभूवुरत्यन्तसुशक्तिजुष्टाः ॥२३६॥

महान्तो योगिनस्त्वन्ये तन्त्रमन्त्रविशारदाः ।
सत्सिद्धा ध्यानिनस्तीर्थे बभूवुः केचनाद्य च ॥२४०॥

अत्र मन्दिरे नूतनमाश्चर्यदृश्यम् :—

श्रीमच्छङ्करवैद्यनाथसुषमापूर्णे मठाभ्यन्तरे
प्रोच्चस्तूपगमष्टसद्दलमयं पद्मं पुरा निर्मितम् ।
आस्तेऽधोमुखमङ्घ्रु तं सुरुचिरन्तस्मात्पतत्यम्बुनो–
विन्दुस्तं प्रथमं हि पश्यति जनोऽत्राश्चर्य्यदृश्यन्त्विदम् ॥२४१॥

× × ×

अथ श्रीवैद्यनाथशिव-ध्यानम् :—

वन्दे गौरीपतिन्तं परशुमृगवराभीतिहस्तं सुराद्यं
भास्वच्चन्द्रावतंसं रजतनगनिभं पद्मसंस्थं प्रसन्नम् ।
ब्रह्माण्डोत्पत्ति-रक्षा-प्रलयकर—महाशक्तिजुष्टं विशिष्टं
सेव्यं देवैः समन्तात्सकलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥ २४२ ॥

देवं श्रीपार्वतीशं सुर-मुनिनिवहैः स्तूयमानं समन्तात्
कल्याणानां निधानं सकलसुमतिदं वन्दनीयं वरेण्यम् ।
आरोग्यायुःप्रदन्तं प्रचुरसुत-यशः-श्रीकरं पुष्टिदञ्च
वन्दे भक्त्या भवेशं भवभयहरणं शङ्करं वैद्यनाथम् ॥ २४३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीवैद्यनाथशिवस्तुतिः :—

सतीमातुस्तस्मिन् विमलहृदये तन्निवसितं
महादेवं गौरीपतिमतिनमस्यं सुर-गणैः ।
समाराध्यं शश्वन्मुनिभिरथभक्तैर्बहुविधैः
परं वन्दे शम्भुं जगति सकलेष्टार्थफलदम् ॥२४४ ॥

महेशं विश्वेशं भवजलधिपोतं सुरवरं
परब्रह्मानन्दं मुनिगण-समाराधितपदम् ।
उमाजुष्टं सौम्यं प्रथितमहिमानं गुणनिधिं
भजे भक्त्या भूयो भुवनभरणं भूतमुपतिम् ॥ २४५ ॥

त्रिलोकेशं मान्यं भवभयहरं भक्तसुभरं
सुराधीशं श्रेष्ठं मुनिगण-मनोमोदनिरतम् ।
हरं श्रीहार्दस्थं नगपतिसुताऽऽराधिततनुं
सदा ध्यायन् वन्दे त्रिनयनममुं पञ्चवदनम् ॥ २४६ ॥

पवित्रं लोकानां पितरमुमयाऽऽसेवितपदं
सदा ध्येयं गेयं परममिह पूज्यं शशिधरम् ।
प्रणम्यं स्मार्यश्चाखिलभुवनपालं सुरनुतं
भजे सेव्यं भव्यं सकलशुभदं शङ्करममुम् ॥ २४७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"श्रीवैद्यनाथशिवप्रशस्तिः"

भवानीशं भव्यं भजनभयभङ्गव्यसनिनं
भवं भास्वद्भूतं भुवि भरणमुद्भासितविभम् ।
विभूत्या विभ्राजं भुवन-भवनं भारतविभुं
भजे भक्त्यालभ्यं शुभदमथभक्ताभयकरम् ॥ २४८ ॥

सुराः सर्वे वन्द्यास्तव सुकृपया विश्वविदितं
परं देवत्वन्तत् सुखममृतपानन्त्वतिप्रियम् ।
समृद्धिन्तान्दिव्यां समधिगतवन्तश्च विविधां
परन्त्वास्ते स्वेऽर्थे शिव इह सदा रिक्त इति सत् ॥ २४९ ॥

अतो वन्द्यं सर्वाधिकमिह परार्थे विनिरतं
सदा सेव्यं देवाधिपमतिसुचिन्त्यं कुशलदम् ।
गणेशाम्बाजुष्टं त्रिभुवन–महोच्चं शुभमयं
नमामि त्वां भक्त्या भवजलधिपोतं प्रभुवरम् ॥ २५० ॥

जटायां गङ्गाऽस्ते विधुरथ सुभाले हुतवह–
स्तृतीये नेत्रेऽसौ गरलमपि कण्ठे च तनुषु ।
लसन्त्यस्यानेके फणिन उत भस्मावृतवपुः
स इत्थं भूषाभिर्विलसित शिवोऽत्रास्ति वरदः ॥ २५१ ॥

वृषः खट्वाङ्गश्चाजिनपरशुकौ भस्मफणिनः
कपालानां माल्यं परमथ पिशाचाः सहचराः ।
अमाङ्गल्यानीत्थन्तव वरद ! पात्राणि भगवँ–,
स्तथापि स्मर्तॄणान्त्वमसि सुखदस्त्वं हि शुभदः ॥ २५२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रविस्त्वं चन्द्रस्त्वन्त्वनिल उत वह्निः सुसलिलं
त्वमेवास्से भूमिः प्रकृतिरसि प्राणाः खमपि च।
निधानं विश्वेषां त्वमसि परमा शक्तिरथ सा
त्वमात्मा त्वं माता त्वमिह च पिता त्वं गुरुवरः॥ २५३॥

शरण्यस्त्वं नित्यं गतिरसि च बीजं हि जगतां
त्वमेवास्से सत्यं परमहितदं ज्ञानमपि तु।
परन्तत्त्वन्त्वन्तत् त्रिगुणमयशक्तिस्त्वमिह सत्
त्वमुत्कृष्टन्तेजस्त्वमसि च भवोद्धारणरतः॥ २५४॥

अपर्णा सा देवी भुवन-जननी यस्य गृहिणी
सुतौ यस्य प्रेष्ठौ गणपति-महासेनक-सुरौ।
त्रिशूलन्दिव्यास्त्रं भवभयहरं यस्य विदितं
स आस्ते गौरीशो निजपरिजनामोदितवपुः॥२५५॥

कराभ्यां वामाभ्यां परशुमृगकौ सन्धरति यो
वराभीती ते सत्करकमलयोर्दक्षिणयोः।
परं विभ्राजेते नगपति-सुतेशस्य महतः
स एवं भूतोऽर्च्यो जयति भगवाञ्छङ्कर इह॥२५६॥

सहस्रं नागेशाः स्वयमपि च वाणी शतमिता
स्वयं देवेन्द्रो वै सुरगुरुरथाकाश उत च।
इमे सर्वे शम्भोर्गुणनिवहशक्तीर्यदि सदा
वदेयुस्तत्रापि प्रियशिवगुणान्तो नहि भवेत्॥२५७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"श्रीवैद्यनाथशिवप्रशस्तिः"

गौरीषडाननगणेश-प्रमोदमान-
सद्धार्दपीठसुखवासविकासमान ।
धर्मार्थकामशुभमोक्षप्रदानदक्ष
श्रीवैद्यनाथ ! तव पादयुगं प्रपद्ये ॥२५८॥

ब्रह्मर्षिसिद्धमुनिसन्मनुजाभिवन्द्य
भक्ताशुतोष सुरसङ्घनमस्कृताङ्ग ।
लोकाभयप्रद सुरक्षक प्राणनाथ
श्रीवैद्यनाथ ! तव पादयुगं प्रपद्ये ॥२५९॥

सृष्टिस्थितिप्रलयकृद्भुवनेशवन्द्य
लोकार्त्तिहृन्नियतिभृन्नटराजराज ।
ब्रह्मस्वरूप फणिनायकलिप्तकाय
श्रीवैद्यनाथ शिव तेऽङ्घ्रियुगं प्रपद्ये ॥२६०॥

हे भाललोचन महेश वृषध्वजेश
गङ्गाधर प्रमथनाथ सुनीलकण्ठ ।
सद्व्याघ्रचर्मवसनावृत शूलपाणे
श्रीवैद्यनाथ हर ! तेऽङ्घ्रियुगं प्रपद्ये ॥२६१॥

आयुष्यवर्धक समस्तगुणाभिराम
सौभाग्यदायक भवाधिप भव्यमूल ।
मायापते पशुपते जगदेकपाल
देवाधिदेव ! तव पादयुगं प्रपद्ये ॥२६२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कालेश दुःखहर सर्वग विश्वनाथ
कैलासनाथ सुषमास्पद पार्वतीश ।
काशीपते सुरसुसेवित मुक्तिहेतो
श्रीवैद्यनाथ ! तव पादतलं प्रपद्ये ॥२६३॥

हे पञ्चवक्त्र नयनत्रितयातिदीप्त
पद्मासनस्थ सुजटाधर चन्द्रचूड़ ।
विश्वाद्यसर्वभयहृज्जड़चेतनेश
सद्वैद्यनाथ ! तव सच्चरणौ प्रपद्ये ॥२६४॥

गौरीपते सुवरदायक वेदगात
त्रैलोक्यनाथ सुरवन्दित पद्म ।
देवाधिदेव हर शङ्कर सौम्यरूप !
सद्वैद्यनाथ ! तव पादयुगं भजामि ॥२६५॥

श्रीधूर्जटे परशुधृङ् मृगहस्त वन्द्य
सम्यक् लसच्छुभवराभयपाणिपद्म ।
भूभारभृत् त्रिदिवसच्छुभधामपुञ्ज
शम्भो ! तवाङ्घ्रिसरसीरुहमाश्रयामि ॥२६६॥

दारिद्र्यदुःखभयमोचन जीवनेश
सम्पूर्णकामफलदायक वैद्यनाथ ।
दाक्षायणीशुभपते जगदम्बिकेश
कालेश देव ! तव पादयुगं स्मरामि ॥२६७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"श्रीवैद्यनाथशिवप्रशस्तिः"

कल्याणराशिदमपूर्वसुबोधकारं
सद्धार्दपीठगतमाशुफलप्रदन्तम् ।
धर्मार्थकामवरमोक्षप्रदानदक्षं
श्रीवैद्यनाथमनिशं प्रणमामि शम्भुम् ॥२६८॥

गौरीगणेशवरषण्मुखशोभमानं
गङ्गासुबालशशिनागविभूषिताङ्गम् ।
खट्वाङ्गसत्परशुदिव्यवराभयैश्च
विभ्राजमानमहमादिगुरुं नमामि ॥२६९॥

विश्वाधिनाथ सुरपोषक दीनपाल
देवेशवन्दितपदाम्बुज सिद्धसेव्य ।
शैलाधिराजतनयापरिसेव्यमान
शम्भो प्रमोदधर ! तेऽङ्घ्रियुगं नमामि ॥२७०॥

श्रीहार्दपीठगतपूजितप्राणनाथ
मृत्युञ्जय प्रणतपाल दयानिधान ।
गौरी-विनायक-षडानन-राजमान
हे वैद्यनाथ शिव ! ते चरणौ नमामि ॥२७१॥

भूतेश सत्पशुपते प्रमथाधिनाथ
प्राणाशुपालक सुरार्चित कामनेश ।
विश्वार्त्तिहारक परेश नगात्मजेश
श्रीवैद्यनाथ युगनाथ ! नमो नमस्ते ॥२७२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"श्रीवैद्यनाथशिवप्रशस्तिः"

श्रीमेनकासुतनयापरिसेव्यमान
श्रीकार्त्तिकेयगणनाथकशोभमान ।
आयुःसुपुष्टिकर भक्तजनातिसेव्य
श्रीवैद्यनाथ शुभनाथ ! नमो नमस्ते ॥२७३॥

कैलाससगौर वृषभेश धनेशमित्र
त्रैलोक्यरक्षक सुरेश जगन्निवास ।
स्वर्लोकवासिबहुपूजितपादपद्म
श्रीवैद्यनाथ शिवदेव ! नमो नमस्ते ॥२७४॥

आर्यापते निखिललोकपते परेश
सम्यग्वराभयकराब्ज-विलासमान ।
गङ्गाशशाङ्कफणिभस्मविभूषिताङ्ग
श्रीवैद्यनाथ पशुनाथ ! नमो नमस्ते ॥२७५॥

श्रीमन्महेश रजताचलवत्प्रकाश
रत्नोज्ज्वलाङ्ग कमलासन सुप्रसन्न ।
देवर्षिवृन्द-परिसंस्तुत उग्रनाथ
श्रीवैद्यनाथ गिरिजेश ! नमो नमस्ते ॥२७६॥

कल्पान्तकृत् कलुषनाशन कालनाथ
कामोपभोगरहिताङ्ग कलानिधान ।
कालीसमेतकरुणाकर कामनेश
श्रीवैद्यनाथ कविवर्य ! नमो नमस्ते ॥२७७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"श्रीवैद्यनाथशिवप्रशस्तिः"

काव्यप्रमोदकर कामदलिङ्ग काम्य
काशीक्रमप्रियसुकर्मफलास्तिकार ।
कालाधिनायक कपालविधृक् कृपेश
श्रीवैद्यनाथ कविनाथ ! नमो नमस्ते ॥२७८॥

विश्वप्रशान्तिकर लोकहितानुरक्त
ज्ञानप्रभाकर विभूति-विभूषिताङ्ग ।
सद्बोधगम्य विबुधाधिप वेदगीत
श्रीवैद्यनाथ कविवन्द्य ! नमो नमस्ते ॥ २७९ ॥

हे प्राणदेव गिरिजेश सुरेश शम्भो
ब्रह्मेन्द्रविष्णुपरिपूजित कामनाथ ।
भक्तैकपाल भुवनाधिप भव्यमूर्त्ते
श्रीवैद्यनाथ सुरवन्द्य ! नमो नमस्ते ॥ २८० ॥

आरोग्यदायक सुरेश्वर शूलपाणे
गौरीप्रिय प्रमुदितानन दिव्यरूप ॥
आयुःप्रवर्द्धक सुखाकर भक्तपाल
हे वैद्यनाथ मुनिनाथ ! नमो नमस्ते ॥ २८१ ॥

विश्वेश सत्यशिव सुन्दर निर्विकल्प
मृत्युञ्जय प्रचुरकामदलिङ्ग भव्य ।
श्रीवैद्यनाथ जगदीश्वर भूतनाथ
सर्वादिदेव सुखपूर ! नमो नमस्ते ॥ २८२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"श्रीवैद्यनाथशिवप्रशस्तिः"

संसारदुःखभयमोचन सर्वरूप
सर्वेष्टसाधनपरायण भूमिपाल ।
देवाधिदेव मदनान्तक धूर्जटेश
श्रीवैद्यनाथ वरदेश ! नमो नमस्ते ॥ २८३ ॥

हे पार्वतीप्रिय समस्तविभूतिदीप्त
सर्वार्थसाधक कृपाकर दीनबन्धो ।
सर्वेश सर्वगत शर्मद सत्यरूप
श्रीवैद्यनाथ जयनाथ ! नमो नमस्ते ॥ २८४ ॥

हे माधवप्रिय भवेश भवाब्धिपोत
भक्तार्त्तिहृद्गुणगणेश महामतीश ।
सर्वाद्य शक्तिधर लोकपतेऽतिवन्द्य
श्रीवैद्यनाथ सुरनाथ ! नमो नमस्ते ॥ २८५ ॥

हे दक्षयज्ञविनिवारकरुद्र शर्व
दीव्यत्त्रिशूलसुकपालधर प्रपूज्य ।
चन्द्रार्धचूड रजताभ फणीशसेव्य
श्रीवैद्यनाथ गतिनाथ ! नमो नमस्ते ॥२८६॥

प्राणप्रपूर नगराज-सुताधिनाथ
भक्ताभयप्रद जयेश जगन्निवास ।
गीर्वाणवृन्दपरिपूजित काममूर्त्ते
श्रीहार्दपीठगतदेव ! नमो नमस्ते ॥२८७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हे देवदेव वरदायक जीवनाथ
श्रीपार्वतीश सुगणेशपितः परेश ।
योगेश्वर प्रथितशक्ति-गुणाभिराम
ब्रह्मर्षिपूजित महेश ! नमो नमस्ते ॥२८८॥

देवेश भक्तभयनाशक दीनबन्धो
दारिद्र्यदुःखनिवहान्तक विश्वपाल ।
हे लोकनाथ गिरिजेश त्रिशूलहस्त
विश्वम्भर प्रणतपाल ! नमो नमस्ते ॥२८९॥

सर्वाद्य सर्वग सुराधिप सर्वनाथ
सर्वज्ञ सर्व-शुभसाधक सर्व-सेव्य ।
सर्वान्तकृत् सकलसौख्यसुदानसक्त
सर्वेश शर्व सुखसिद्ध ! नमो नमस्ते ॥२९०॥

ब्रह्माण्डनायक दिगम्बर साधुसेव्य
मृत्युञ्जय प्रमथनाथ वृष-ध्वजेश ।
प्राणप्रवर्धक सुखप्रद भक्तपाल
श्रीवैद्यनाथ शिवदेव ! नमो नमस्ते ॥२९१॥

श्रीपार्वतीत्रिपुरपूर्वकसुन्दरीयुग्-
दुर्गाऽन्यदेवगणसज्जननीसमेत ।
श्रीमद्गणेशचतुराननवन्द्य-सन्ध्या-
धृग्वैद्यनाथ वरदेव ! नमो नमस्ते ॥२९२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"श्रीवैद्यनाथशिवप्रशस्तिः"

श्रीकालभैरवसमन्वितमल्लयुक्त
श्रीमद्धनाधिपकुबेरविराजमान ।
सद्देववृन्द-हनुमत्तुलसीसमेत
श्रीवैद्यनाथ सुरनाथ ! नमो नमस्ते ॥२६३॥

श्रीमत्प्रपूज्यमनसासुरवन्द्य-लक्ष्मी-
श्रीशारदासुदिननायक-देवजुष्ट ।
पीताम्बरान्वित-सलक्ष्मणरामसीता-
युग्वैद्यनाथ जगदीश ! नमो नमस्ते ॥२६४॥

गङ्गासवितृतनयासुसरस्वतीभृद्-
गोदावरीप्रथितसिन्धुकनर्मदाऽऽढ्य ।
कावेरिकालसितशङ्कर चन्द्रमौलिन्
श्रीवैद्यनाथ सुखपुञ्ज ! नमो नमस्ते ॥२६५॥

आनन्दभैरवशिवान्वितशम्भुदेव-
सन्नर्मदेशभवसागरतारिणीभृत् ।
श्रीकालिकावरकरासुखदाऽन्नपूर्णा-
भृद्वैद्यनाथ शुभपूर ! नमो नमस्ते ॥२६६॥

नारायणेन रमया च विभासमान
श्रीनीलकण्ठशनिदेवसुदीप्तशम्भो ।
सच्चक्रयुग्वृषभराजित मन्दिरेश
श्रीवैद्यनाथ शिवदेव ! नमो नमस्ते ॥२६७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ढक्काप्रवाद्यवरशब्दसुशास्त्रकार
वेदाद्यनेकविधशास्त्रसुधाब्धिकार ।
विज्ञानसूक्ष्मतरबोधविकासकार
श्रीवैद्यनाथ मतिनाथ ! नमो नमस्ते ॥२९८॥

हे देववन्द्य करुणावरुणालयेश
लोकार्त्तिहृद् वरदहस्त महाप्रकाश ।
श्रीविश्ववन्द्य भवभूतिभर प्रभेश
श्रीवैद्यनाथ गुणनाथ ! नमो नमस्ते ॥२९९॥

आयुःप्रवर्धक महाबलपुष्टिकार
सत्पुत्रदायक धनप्रद कीर्त्तिकार ।
आरोग्यसाधक सुखाकर विश्वकार
श्रीवैद्यनाथ सुरसेव्य ! नमो नमस्ते ॥३००॥

कैलास-पर्वतनिवासप्रमोदमान
गौरी-विनायक-षडाननशोभमान ।
चञ्चत्-त्रिशूलवृष-व्यालशशाङ्कदीप्त
श्रीवैद्यनाथ ! शिव ! कामद ! ते नमस्ते ॥३०१॥

सत्पुत्रवर्धनपरायण पार्वतीश
साम्राज्यभोगसुखसाधक भक्तिगम्य ।
विद्यासुबुद्धिगुणराशिप्रदानशील
श्रीवैद्यनाथ शुभनाथ ! नमो नमस्ते ॥३०२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विद्याविबोधगुणदायक दीननाथ
सम्पत्तिपूरक जयेश जगन्निधान ।
गौरीमुखार्पितमनाः ! तव पादयोः सद्
ध्याने रुचिर्भवतु मे प्रणतस्य नित्यम् ॥३०३॥

हे रावणेश्वर सुकामप्रदानदक्ष
विद्याधरामरगणैरभिवन्द्यमान ।
सदेव-वैद्यपरिपूजित-वैद्यनाथ
त्वत्पादपद्मसु मनो मम लग्नमस्तु ॥३०४॥

लङ्काधिनाथसमुपार्जितशम्भुलिङ्ग
भूतेश सर्वविधशक्तिविकासमान ।
कल्पान्तकृत् सकलविश्वसुसृष्टिकार
श्रीवैद्यनाथ शिव ! तेऽङ्घ्रिरताऽस्तु भक्तिः ॥३०५॥

सर्वेश सर्वविधशक्तिविभूषिताङ्ग
कल्याणसाधक सुराधिप विश्वपाल ।
हे सर्वकामपरिपूरक दीनबन्धो !
त्वत्पादपद्मसुगता मम भक्तिरस्तु ॥३०६॥

हे प्राणनाथ विबुधावलिवृन्दवन्द्य
त्रैलोक्य-जीवनप्रदायकवैद्यनाथ ।
श्रीकार्त्तिकेयगणनाथपितः ! तवैव
पादारविन्दसुगता मम प्रीतिरस्तु ॥३०७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्त्रीयोपवेशन-सुयन्त्रगतेन "शक्त्याः"
पीठेन देवमहितेन विलासमान ।
दाक्षायणीहृदयपद्म-विकासमान
श्रीवैद्यनाथ ! तव पादतलेऽस्तु चित्तम् ॥३०८॥

योगेश योगगतमानस योगिवर्य्य
योगीन्द्र योगिजनगम्य सुयोगरूप ।
योगावसक्तफलदायक योगनाथ
श्रीवैद्यनाथ ! शिव ! तेऽङ्घ्रिगतं मनोऽस्तु ॥३०९॥

नाना-पुराण-निगमागम-शास्त्रसङ्घैः
संवर्णनीय-मुनिसिद्धसुधीभिरर्च्य ।
दीव्यत्प्रभाऽऽढ्य पुरुषार्थप्रदानदक्ष !
त्वत्पादपद्मसु सदा मम भक्तिरस्तु ॥३१०॥

आयुष्यमारोग्यमतीवभाग्यं
विद्यां यशः श्रीसुखसम्पदश्च ।
पत्नीसुपुत्रान् वरधर्मभक्ती-
र्ददाति तुष्टः शिववैद्यनाथः ॥३११॥

ॐ नमः शिवाय रावणेश्वरश्रीवैद्यनाथाय शङ्कराय नमः ।

* * * * *

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उपसंहृतिः

गौरीशस्य महेश्वरस्य भगवच्छ्रीवैद्यनाथस्य सद्
भावैर्भक्तिभरैस्तथा बहुविधैराख्यानकैरुत्तमैः ।
लालित्यान्वितपुस्तकं सुखकरं भक्तप्रियं पावनं
निर्माणं समगाच्छिवस्य कृपया छन्दोभिरेभिः शिवम् ॥१॥

ग्रन्थ-रचनासमाप्तिकालः :—

निधिशशाङ्कवियद्भुजसम्मिते
नृपतिविक्रमहायन आश्विने ।
गुरुदिने सितकामतिथौ शुभे
शिवप्रशस्तिरगादिह पूर्णताम् ॥२॥

ग्रन्थपूर्त्तिहेतुकप्रणामः :—

यस्य कृपाबलेनैव ग्रन्थोऽयं पूर्णतामगात् ।
तस्मै श्रीवैद्यनाथाय शङ्कराय नमोनमः ॥३॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ ग्रन्थकर्त्तृ-परिचयः

भक्त्या प्रणम्य वरदक्षिणकालिकान्तां
श्रीवैद्यनाथभगवन्तममुन्तु नत्वा ।
मातुः पितुश्च चरणान् प्रणिपत्य दिव्यान्
संक्षेपतः परिचयं स्वकमुल्लिखामि ॥४॥

रम्यात् पाटलिपुत्रतो नवमिते क्रोशे हि पूर्वस्थिते
सद् वैकुण्ठपुराभिधो विलसितो ग्रामः सुगङ्गातटे ।
श्रीगौर्य्या सह शङ्करः स भगवानस्त्येव यत्र स्वयं
तत्रैते मिथिलां विहाय पुरुषा ऊषुस्तु मत्पूर्वजाः ॥५॥

श्रीमत्पाटलिपुत्रनामकपुरे ज्योतिर्विदामग्रणी-
र्विख्यातस्तपसा गुणेन यशसा लोकोपकृत्या तथा ।
शश्वत्पुण्यविधानसाधनपरः सोऽनेकविद्याव्रती
सम्मान्यो नृपवृन्दवन्दितपदो ह्यासीत् पिता मे महान् ॥६॥

लोकाम्बाचरणाम्बुजार्चनरतो दानी दयासंवृतो
ज्योतिःशास्त्रमहार्णवेऽतिगहने पारङ्गतो यः श्रुतः ।
छात्रान् दीनजनान् ररक्ष सततं सोऽस्मन्मनीषी पिता
स्वर्गे सम्प्रति राजते शिवमना 'झा' "उग्रनाथा"-भिधः ॥७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीकालीचरणाम्बुजार्चनरता शश्वद्दयाभूषिता
नित्यं या व्रतधर्मसाधुनियमाचाराश्रिता सत्तमा ।
शास्त्रज्ञानपरायणा शुभगुणा दीनोपकृत्यै स्तुता
"गङ्गा"नामविराजिता जयति सा स्वर्गेऽद्य माता मम ॥८॥

श्रीगौरी-गणनाथ-षण्मुखलसच्छम्भोः कृपातो हि सत्
स्वर्गस्थस्य पितुर्महामतिमतः पुण्यात्मनश्चालिताम् ।
दीव्यज्ज्यौतिषशास्त्रकस्य शुभदां वृत्तिं वितन्वन् परां
पूज्यस्यात्मपितुः सदाऽनुकुरुते श्रीविष्णुकान्तो नतः ॥९॥

अनन्तशक्त्याः शुभदक्षिणायाः
श्रीकालिकायाश्चरणारविन्दम् ।
ध्यायन् प्रशस्तिं विरचय्य वृत्तैः
स्वान्तः सुखं सैष जनो ह्युपैति ॥१०॥

श्रीवैद्यनाथवरशङ्करसुकृपातः
स्वस्यालये सुनिवसन्निह पुष्पपुर्याम् ।
"श्रीवैद्यनाथशिव"-प्रीतिविवृद्धिहेतो-
स्तत्पुस्तकं व्यरचयम्प्रणतोऽहमेतत् ॥११॥

ओ३म्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीवैद्यनाथशिवप्रशस्तिग्रन्थे

शुद्धिपत्रम्

पृष्ठानि	श्लोकाङ्काः	पंक्तयः	अशुद्धाः	शुद्धाः
१	२	१	सुमानिताथः	सुमानितार्थः
१	३	१	लङ्कश	लङ्केशः
१	४	२	सेवकय	सेवकाय
२	१०	शीर्षके	रम्मः—	रम्मः :—
३	१२	शीर्षके	द्वेग :—	द्वेगः :—
३	१४	१	रूपां	रूपो
४	१९	शीर्षके	हेतुः—	हेतुः :—
४	२२	शीर्षके	वृष्टिः—	वृष्टिः :—
५	२६	शीर्षके	सिद्धि :—	सिद्धिः :—
६	३०	शीर्षके	शिवोक्ति : —	शिवोक्तिः :—
६	३२	शीर्षके	प्रवृत्ति :—	प्रवृत्तिः : —
७	३६	शीर्षके	गमः—	गमः :—
७	३७	शीर्षके	शङ्कर :—	शङ्करः :—
८	४३	१	मन्द्र	मैन्द्र
९	४७	३	वत्तुंल	वर्त्तुल
१०	५१	शीर्षके	वर्त्तला	वर्त्तुला
१०	५२	शीर्षके	हेतुः—	हेतुः :—
१२	५९	शीर्षके	गणेश :—	गणेशः :—
१२	५९	२	विघ्नान्	विघ्नान्
१२	६०	१	स्यां	स्यो
१३	६२	शीर्षके	भैरव :—	भैरवः :—
१३	६२	१	"बाबा" मन्दिर	"बाबा"–मन्दिर
१३	६४	२	द्वैं	द्वै
२०	८९	२	सन्ध्ययास्ते	सन्ध्ययोस्ते
२०	९०	१	हरेति शब्दं	हरेति-शब्दं
२०	९१	१	सुपूजका	सुपूजको
२१	९५	शीर्षके	यत्न :—	यत्नः :—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पृष्ठानि	श्लोकाङ्काः	पंक्तयः	अशुद्धाः	शुद्धाः
२१	९६	शीर्षके	मक्ता :—	मक्ताः :—
२३	१०४	२	परिता	परितो
२३	१०७	२	विलेपयित्वा	तल्लेपयित्वा
२३	१०८	२	ऽर्वं	ऽर्वं
२५	११५	शीर्षके	कपरा	कपूरा
२८	१३०	४	निचया	निचयो
३२	१४६	शीर्षके	पना	पूना
३७	१७३	२	स्पष्टं नास्ति	यो
३९	१८२	१	कष्ट	कष्टे
४०	१८९	२	याऽराध्यामाना	याऽराध्यमाना
४१	१९०	१	ब्रह्मन्द्रो	ब्रह्मे न्द्रो
४१	१९०	३	हसन्त	हसन्तौं
४८	२२३	१	श्रष्ठः	श्रेष्ठः
५०	२३५	शीर्षके	महात्मनः	महात्मानः
५४	२५६	२	गयाः	गयोः
५४	२५७	३	गुण	गंण
५५	२६०	४	शिव	शिव !
५५	२६०	४	तेङ्घ्रियुगं	तेऽङ्घ्रियुगं
५६	२६५	१	वेदगात	वेदगीत
५६	२६५	२	सुरवन्दित पद्म	सुरवन्दित-पादपद्म
५८	२७३	१	सेव्य.	सेव

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मूल्य ३)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

જય ભારત

मुद्रक—युनियन प्रेस, पटना-४ १९६४ ई०

Dr..Urmila Sharma Collection, Varanasi